॥अथयोगसूत्रग्रंथपुस्तकप्रारंभः॥ श्रीमहादेवायनमः॥

श्रीगणेशायनमः देहार्धयोगःशिवयोःसश्रेयांसितनोतुवः दुःप्रापमपियत्स्मृत्याजनःकैवल्यमश्नुते १ त्रिविधा
न्यपिदुःखानियदनुस्मरणान्नृणां प्रयांतिसद्योविलयंतंस्तुमःशिवमव्ययं २ पतंजलिमुनेरुक्तिःकाप्यपूर्वाजयत्य
सौ पुंप्रकृत्योर्वियोगोपियोगइत्युदितोयया ३ जयंतिवाचःफणभर्तुरांतरस्फुरत्तमस्तोमनिशाकरत्विषः विभाव्यमानाः
सततंमनांसियाःसतांसदानंदमयानिकुर्वते ४ शब्दानामनुशासनंविदधतापातंजलेकुर्वतावृत्तिंराजमृगांकसंज्ञकम
पिव्यातन्वतावैद्यके वाक्चेतोवपुषांमलःफणिभृतांभर्त्रेवयेनोद्धृतस्तस्यश्रीरणरंगमल्लनृपतेर्वाचोजयंत्युज्वलाः ५ दु
र्बोधंयदतीवतद्विजहतिस्पष्टार्थमित्युक्तिभिः स्पष्टार्थेष्वतिविस्तृतिंविदधतिव्यर्थैःसमासादिकैः अस्थानेनुपयोगिभिश्च
बहुभिर्जल्पैर्भ्रमंतन्वते श्रोतॄणामितिवस्तुविप्लवकृतःसर्वेपिटीकाकृतः ६ उत्सृज्यविस्तरमुदस्यविकल्पजालंफ
ल्गुप्रकाममवधार्यचसम्यगर्थान् संतःपतिंजलिमतेविवृतिर्मयेयमातन्यतेबुधजनप्रतिबोधहेतुः ७ अथयोगानु शिव
शासनं अनेनसूत्रेणशास्त्रस्यसंबंधाभिधेयप्रयोजनान्याख्यायंते अथशब्दोधिकारद्योतकोमंगलार्थकश्च १

युक्तिर्योगः युजसमाधौसमाधानं अनुशिष्यतेव्याख्यायतेलक्षणभेदफलोपायैर्येनतदनुशासनं योगस्यानुशासनंयोगानु
शासनं तदाशास्त्रपरिसमाप्तेरधिकृतंबोद्धव्यमित्यर्थः तत्रशास्त्रस्यव्युत्पाद्यतयायोगःससाधनःसफलोभिधेयः।तद्व्यु
त्पादनंचफलं। व्युत्पादितस्ययोगस्यकैवल्यंफलं। शास्त्राभिधेययोःप्रतिपाद्यप्रतिपादकभावलक्षणःसंबंधः।अभिधे
यस्ययोगस्यतत्फलस्यचकैवल्यस्यसाध्यसाधनभावः।एतदुक्तंभवति। व्युत्पाद्यस्ययोगस्यसाधनानिशास्त्रेणप्रदर्श्यंते
तत्साधनसिद्धोयोगःकैवल्यंफलमुत्पादयति तत्रकोयोगइत्यतआह योगश्चित्तवृत्तिनिरोधः चित्तस्यनिर्मलसत्वपरि
णामरूपस्ययावृत्तयोंगांगिभावपरिणामरूपास्तासांनिरोधोबहिर्मुखपरिणतिविच्छेदादंतर्मुखतयाप्रतिलोमपरिणामेन
स्वकारणेलयोयोगइत्याख्यायते सचनिरोधःसर्वासांचित्तस्यभूमीनांसर्वप्राणिनांधर्मःकदाचित्कस्यांचिद्भूमावाविर्भव
ति ताश्चक्षिप्तंमूढंविक्षिप्तंएकाग्रंनिरुद्धमितिचित्तस्यपंचभूमयः चित्तस्यावस्थाविशेषाः तत्रक्षिप्तंरजसउद्रेकादस्थिरंब
हिर्मुखतयासुखदुःखादिविषयेषुविकल्पितेषुव्यवहितेषुसंनिहितेषुवारजःप्रेरितं तच्चसदेवदैत्यदानवादीनां मूढं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तमसउद्रेकात् कृत्याकृत्यविभागमगणयत् क्रोधादिभिर्विरुद्धकृत्येष्वेवनियमितं तच्चसदैवरक्षःपिशाचादीनां वि
क्षिप्तंतुसत्वोद्रेकाद्वैशिष्ट्येनपरिहृत्यदुःखसाधनंसुखसाधनेष्वेवशब्दादिषुप्रवृत्तंतच्चसदैवदेवानां एतदुक्तंभवति
रजसाप्रवृत्तिरूपंतमसापरापकारनिरतंसत्वेनसुखमयंचित्तंभवति एतास्तिस्रःचित्तावस्थाःनसमाधावुपयोगिन्यः
एकाग्रनिरुद्धरूपेद्वेचसत्वोत्कर्षाद्यथोत्तरमवस्थितत्वात्समाधावुपयोगंभजेते सत्वादिक्रमव्युत्क्रमेत्वयमभिप्रायः
द्वयोरपिरजस्तमसोःस्थैर्यंतहेयत्वेप्येतदर्थंरजसःप्रथममुपादानंयावन्नप्रवृत्तिर्दर्शितातावन्निवृत्तिर्नशक्यतेदर्श
यितुमितिद्वयोर्व्यत्ययेनप्रदर्शनं सत्वस्यत्वेतदर्थंपश्चात्प्रदर्शनं यत्तस्योत्कर्षेणोत्तरेद्वेभूमीयोगोपयोगिन्यावि
तिअनयोर्द्वयोरेकाग्रनिरुद्धयोर्यश्चित्तस्यैकाग्ररूपःपरिणामःसयोगः किमुक्तंभवति एकाग्रेबहिर्वृत्तिनिरो शिव
धः निरोधेचसर्वासांवृत्तीनांससंस्काराणांप्रविलयःइत्यनयोरेवभूम्योर्योगस्यसंभवः इदानींसूत्रकारश्चित्तवृ २
त्तिनिरोधपदानिव्याख्यातुकामःप्रथमंचित्तपदंव्याचष्टे तदाद्रष्टुःस्वरूपेवस्थानं द्रष्टुःपुरुषस्यतस्मिन्काले

चिन्मात्ररूपतायांअवस्थानंस्थितिर्भवति अयमर्थः उत्पन्नविवेकख्यातेश्चित्तसंक्रमाभावात्कर्तृत्वाभिमाननिवृत्तौ
प्रोन्मुक्तपरिणामायांबुद्धावात्मनःस्वरूपेणावस्थानंस्थितिर्भवति व्युत्थानदशायांतस्यकिंस्वरूपमित्याह वृत्तिसा
रूप्यमितरत्र इतरत्रयोगादन्यस्मिन्कालेवृत्तयोवक्ष्यमाणलक्षणाःताभिःसारूप्यंतद्रूपत्वं अयमर्थः यादृश्यो
वृत्तयःसुखदुःखमोहात्मिकाःप्रादुर्भवंतितादृग्रूपएवसंवेद्यतेव्यवहर्तृभिःपुरुषः तदेवंयस्मिन्नेकाग्रतयापरिणते
विविक्तःस्वस्मिन्रूपेप्रतिष्ठितोभवतियस्मिंश्चेंद्रियवृत्तिद्वारेणविषयाकारेणपरिणतेपुरुषस्तदाकारइवपरिभाव्यते
यथाजलतरंगेषुचलत्सुचंद्रश्चलन्निवप्रतिभासतेतच्चित्तं वृत्तिपदंव्याख्यातुमाह वृत्तयःपंचतय्यःक्लिष्टाक्लिष्टाः
वृत्तयश्चित्तस्यपरिणामविशेषाः वृत्तिसमुदायरूपस्यावयविनःयाअवयवरूपावृत्तयःतदपेक्षयातयप्प्रत्ययः ए
तदुक्तंभवति पंचवृत्तयःकीदृशाःक्लिष्टाक्लिष्टाः क्लेशैर्वक्ष्यमाणलक्षणैराक्रांताःक्लिष्टाःतद्विपरीताअक्लिष्टाः॥
ताएवपंचवृत्तयःसमुद्दिश्यव्याख्यायंते प्रमाणविपर्ययविकल्पनिद्रास्मृतयः आसांक्रमेणलक्षणमाह प्रत्यक्षा

नुमानागमाः प्रमाणानि अत्रातिप्रसिद्धत्वात्प्रमाणानांशास्त्रकारेणभेदनिरूपणेनैवगतत्वाल्लक्षणस्यनपृथक्तल्लक्ष
णंकृतं प्रमाणलक्षणंतु अविसंवादिज्ञानंप्रमाणंइंद्रियद्वारेणबाह्यवस्तूपरागाच्चित्तस्यतद्विषयासामान्यविशेषा
त्मनोर्थस्यविशेषावधारणप्रधानावृत्तिःप्रत्यक्षं गृहीतसंबंधाल्लिंगाल्लिंगिनिसामान्यात्मनाध्यवसायोनुमानं आप्त
वचनमागमः एवंप्रमाणरूपांवृत्तिंव्याख्यायविपर्ययरूपामाह विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठं अतथाभूतेर्थे
तथोत्पद्यमानंज्ञानंविपर्ययः यथाशुक्तिकायांरजतज्ञानं अतद्रूपप्रतिष्ठमिति तस्यार्थस्ययद्रूपंनतस्मिन्रूपेप्रति
तिष्ठतितस्यार्थस्ययत्पारमार्थिकंरूपंनतत्प्रतिभासयतीतियावत् संशयोप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानं यथास्था
णुर्वापुरुषोवेति विकल्पवृत्तिंव्याख्यातुमाह शब्दज्ञानानुपातीवस्तुशून्योविकल्पः शब्दजनितंज्ञानंशब्दज्ञानंतद
नुपतितुंशीलंयस्यसशब्दज्ञानानुपाती वस्तुनस्तथात्वमनपेक्षमाणोयोध्यवसायःसविकल्पइत्युच्यते यथापु शिव
रुषस्यचैतन्यंस्वरूपमिति अत्रदेवदत्तस्यकंबलइतिशब्दजनितेज्ञानेषष्ठ्यायोध्यवसितोभेदःतमिहाविद्य ३

मानमपिसमारोप्याध्यवसायः वस्तुतस्तुचैतन्यमेवपुरुषः निद्रांव्याख्यातुमाह अभावप्रत्ययालंबनावृत्तिर्निद्रा
अभावप्रत्ययःआलंबनंयस्यावृत्तेःसातथोक्ता एतदुक्तंभवति यासंततमुद्रिक्तत्वात्तमसःसमस्तविषयपरित्यागे
पूं नप्रवर्त्ततेवृत्तिःसानिद्रा अस्याश्चसुखमहमस्वाप्सं इतिस्मृतिदर्शनात् स्मृतेश्चानुभवव्यतिरेकेणानुपपत्तेर्वृत्तित्वं ·
स्मृतिंव्याख्यातुमाह अनुभूतविषयासंप्रमोषःस्मृतिः प्रमाणेनानुभूतस्यविषयस्ययोयमसंप्रमोषःसंस्कारद्वारे
णबुद्धावुपारोहःसस्मृतिः तत्रप्रमाणविपर्ययविकल्पाजाग्रदवस्था एतएवयदानुभवबलात्प्रत्यक्षायमाणाःस
स्वप्नः निद्रात्वसंवेद्यमानविषया स्मृतिश्चप्रमाणविपर्ययविकल्पनिद्रानिमित्ता एवंवृत्तीर्व्याख्यायसोपायंनिरो
धंव्याख्यातुमाह अभ्यासवैराग्याभ्यांतन्निरोधः अभ्यासवैराग्येवक्ष्यमाणलक्षणेताभ्यांप्रकाशवृत्तिनियमरूपाणां श
चित्तवृत्तीनांयःप्रतिहननंसनिरोधः किमुक्तंभवति तासांविनिवृत्तबाह्याभिनिवेशानांअंतर्मुखतयास्वकारणएव
चित्तेशक्तिरूपतयावस्थानं तत्रविषयदोषदर्शनजेनवैराग्येणतद्वैमुख्यमुत्पाद्यतेअभ्यासेनचसुखजनकशांतप्रवा

हप्रदर्शनद्वारेण दृढस्थैर्यमुत्पाद्यते इत्याभ्यां भवति चित्तवृत्तिनिरोधः अभ्यासं व्याख्यातुमाह तत्र स्थितौ यत्नोऽभ्या
सः वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः तस्यां यत्न उत्साहः पुनःपुनस्तत्त्वेन चेतसि विनिवे
शनमभ्यास इत्युच्यते तस्यैव विशेषमाह ॥ स तु ॥ दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः बहुकालं नैरंतर्येणा
दरातिशयेन च सेव्यमानो दृढभूमिः स्थिरो भवति दार्ढ्याय प्रभवतीत्यर्थः वैराग्यस्य लक्षणमाह दृष्टानुश्रविकविष
यवितृष्णस्य वशीकारसंज्ञा वैराग्यं द्विविधो विषयो दृष्ट आनुश्रविकश्च दृष्ट इहैवोपलभ्यमानः शब्दादिः देव
लोकादिरानुश्रविकः अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः तत आगतः आनुश्रविकः तयोर्द्वयोरपि विषययोः
परिणामविरसत्वदर्शनाद्विगतगर्धस्य या वशीकारसंज्ञा ममैते वश्या नाहमेषां वश्य इति योऽयं विमर्शस्तद्वैराग्यमुच्यते
तस्यैव विशेषमाह तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं तद्वैराग्यमुत्कृष्टं प्रथमं वैराग्यं विषयविषयं द्वितीयं गुणविष शिव ४
यं उत्पन्नगुणपुरुषविवेकख्यातेरेव भवति निरोधसमाधेरत्यंतानुकूलत्वात् एवं योगस्य स्वरूपमुक्त्वा संप्रज्ञाता

संप्रज्ञातरूपं भेदमाह वितर्कविचारानंदास्मितारूपानुगमात् संप्रज्ञातः समाधिरिति शेषः सम्यक् संशयविपर्ययर
हितत्वेन प्रज्ञायते प्रकर्षेण ज्ञायते भाव्यस्य रूपं येन स संप्रज्ञातः समाधिर्भावनाविशेषः सवितर्कादिभेदाच्चतुर्विधः सवित
र्कः सविचारः सानंदः सास्मितश्च भावना भाव्यस्य विषयांतरपरिहारेण चेतसि पुनःपुनर्विनिवेशनं भाव्यं च द्विधा ईश्व
रस्तत्त्वानि च तान्यपि द्विविधानि जडाजडभेदात् जडानि चतुर्विंशतिः अजडः पुरुषः तत्र यदा महाभूतेंद्रियाणि स्थूलानि
विषयत्वेनादाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखसंभेदेन च भावना प्रवर्तते तदा सवितर्कः समाधिः अस्मिन्नेवालंबने पू
र्वापरानुसंधानशब्दोल्लेखशून्यत्वेन यदा भावना प्रवर्तते तदा निर्वितर्कः तन्मात्रांतःकरणलक्षणं सूक्ष्मं विषयमालंब्य
तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्त्तते तदा सविचारः तस्मिन्नेवालंबने देशकालधर्मावच्छेदं विना धर्मिमात्रावभा
सित्वेन भावना क्रियमाणा निर्विचार इत्युच्यते एवं पर्यंतः समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते यदा तु रजस्तमोलेशानु
विद्धं अंतःकरणसत्वं भाव्यते तदा गुणभावाच्चिच्छक्तेः सुखप्रकाशमयस्य भाव्यमानस्योद्रेकात् सानंदः समाधिर्भवति अस्मि

न्नेवसमाधौयेबद्धधृतयस्तेतत्त्वांतरंप्रधानपुरुषरूपंनपश्यंतितेविगतदेहाहंकारत्वाद्विदेहशब्दवाच्याः इयंग्रहणसमाप
त्तिस्ततःपरंरजस्तमोलेशानभिभूतंशुद्धंसत्वमालंबनीकृत्ययाप्रवर्त्ततेभावनातस्यांग्राह्यस्यसत्वस्यन्यग्भावात् चितिश
क्तेरुद्रेकात्सत्तामात्रावशेषत्वेनसमाधिःसास्मितइत्युच्यते नचाहंकारास्मितयोरभेदःशंकनीयःयतोयत्रांतःकरणमह
मित्युल्लेखेनविषयान्वेदयतेसोहंकारः यत्रांतर्मुखतयाप्रतिलोमपरिणामेनप्रकृतिलीनेचेतसिसत्तामात्रमेवभातिसा
स्मिता अस्मिन्नेवसमाधौयेकृतपरितोषाःपरंपरमात्मानंपुरुषंनपश्यंतितेषांचेतसिस्वकारणेलयमुपगतेतेप्रकृतिलया
इत्युच्यंते येपरंपुरुषंज्ञात्वाभावनायांप्रवर्त्तंतेतेषामियंविवेकख्यातिर्ग्रहीतृसमापत्तिरित्युच्यते तत्रसवितर्कसमाधौ
चतस्रोप्यवस्थाःशक्तिरूपतयावतिष्ठंतेततएकैकस्यास्त्यागउत्तरोत्तरइतिचतुरवस्थोयंसंप्रज्ञातःसमाधिः असंप्र शिव
ज्ञातमाह विरामप्रत्ययाभ्यासपूर्वःसंस्कारशेषोन्यः विरम्यतेनेनेतिविरामःवितर्कादिचिंतात्यागःविरामश्चासौप्र ५
त्ययश्चविरामप्रत्ययःतस्याभ्यासःपौनःपुन्येनचेतसिविनिवेशनं तत्रयाकाचिद्वृत्तिरुल्लसतितस्यानेतिनेतीतिनैरं

तर्येणपर्युदसनेनतत्पूर्वकःसंप्रज्ञातःसमाधिः संस्कारशेषोन्यस्तद्विलक्षणःअसंप्रज्ञातइत्यर्थः नतत्रकिंचिद्वेद्यंसं
प्रज्ञायतेइत्यसंप्रज्ञातःनिर्बीजःसमाधिः इहचतुर्विधश्चित्तपरिणामः व्युत्थानंसमाधिप्रारंभःएकाग्रतानिरोधश्च
तत्रक्षिप्तमूढेचित्तभूमीव्युत्थानं विक्षिप्ताभूमिःसत्वोद्रेकात्समाधिप्रारंभः एकाग्रतानिरुद्धेतुपर्यंतभूमी प्रतिपरि
णामंचसंस्काराः तत्रव्युत्थानजनिताःसंस्काराःसमाधिप्रारंभजैःसंस्कारैर्हन्यंते तज्जाश्चैकाग्रताजैःनिरोधजनितैरेका
ग्रताजाःसंस्काराःस्वरूपंचहन्यंते यथासुवर्णसंवलितंध्मायमानंसीसकंस्वात्मानंसुवर्णमलंचनिर्दहति एवमेकाग्रताज मा
नितान्संस्कारान्निरोधजाःस्वात्मानंचनिर्दहंति तदेवंयोगस्यस्वरूपंभेदंसंक्षेपेणोपायंचाभिधायविस्तरेणोपायंयोगा
भ्यासप्रदर्शनपूर्वकमुपक्रमते भवप्रत्ययोविदेहप्रकृतिलयानां विदेहाःप्रकृतिलयाश्चवितर्कादिभूमिकासूत्रेव्याख्या
ताःतेषांसमाधिर्भवप्रत्ययः भवःसंसारःसएवप्रत्ययःकारणंयस्यसभवप्रत्ययः अयमर्थः आविर्भूतएवसंसारेतेतथा
विधसमाधिभाजोभवंति तेषांपरतत्वादर्शनाद्योगाभासोयं अतःपरतत्वज्ञानेतद्भावनायांचमुक्तिकामेनयत्नोविधेयइत्ये

तदर्थमुपदिष्टं तदन्येषां तु श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां विदेहप्रकृतिलयव्यतिरिक्तानां योगिनां श्रद्धादि
पूर्वकः श्रद्धादयः पूर्वे उपाया यस्य स श्रद्धादिपूर्वकः ते च श्रद्धादयः क्रमादुपायोपेयभावेन प्रवर्त्तमानाः संप्रज्ञातस्य समाधेरु ना
पायतां प्रतिपद्यन्ते तत्र श्रद्धा योगविषये चेतसः प्रसादः वीर्यमुत्साहः स्मृतिरनुभूतासंप्रमोषः समाधिरेकाग्रता प्र
ज्ञा तत्त्वप्रविवेकः तत्र श्रद्धावतो वीर्यं जायते योगविषये उत्साहवान् भवति सोत्साहस्य पाश्चात्यासु भूमिषु स्मृतिः संजा
यते तत्स्मरणाच्च चेतः समाधीयते समाहितचित्तश्च भाव्यं सम्यग्विजानाति त एते संप्रज्ञातसमाधेरुपायाः तस्याभ्या
सात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः उक्तोपायवतां योगिनामुपायभेदाद्भेदानाह तीव्रसंवेगानामासन्नः समाधिला
भ इति शेषः संवेगः क्रियाहेतुर्दृढतरः संस्कारः स तीव्रो येषामधिमात्रोपायानां तेषामासन्नः समाधिलाभः समाधिफ शिव
लं चासन्नं भवति शीघ्रमेव निष्पद्यत इत्यर्थः के ते तीव्रसंवेगा इत्यत आह मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः तेभ्य
उपायेभ्यो मृद्वादिभेदभिन्नेभ्य उपायवतां विशेषो भवति मृदुर्मध्योऽधिमात्र इत्युपायभेदाः ते प्रत्येकं मृदुसंवेगमध्य

संवेगतीव्रसंवेगभेदात्त्रिविधाः तद्भेदेन नव योगिनो भवन्ति मृदूपायो मृदुसंवेगः मध्यसंवेगः तीव्रसंवेगश्च म
ग ध्योपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च अधिमात्रोपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च अधिमात्रोपाये
तीव्रे च संवेगे महान् यत्नः कर्तव्य इति भेदोपदेशः इदानीमेतदुपायविलक्षणं सुगममुपायान्तरमाह ईश्वरप्रणिधाना
द्वा ईश्वरो वक्ष्यमाणलक्षणः प्रणिधानं तत्र भक्तिविशेषः विशिष्टमुपासनं सर्वक्रियाणामपि तत्रार्पणं विषयसुखादि
के फलमनिच्छन् सर्वाः क्रियास्तस्मिन् परमगुरावर्पयति तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः ईश्व
रस्य प्रणिधानात्समाधिलाभ इत्युक्तं तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभावं वाचकमुपासनाक्रमं तत्फलं च क्रमेण वक्तुमाह
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः क्लिश्नन्तीति क्लेशाः अविद्यादयो वक्ष्यमाणाः विहितप्रति
षिद्धव्यामिश्ररूपाणि कर्माणि विपच्यन्त इति विपाकाः कर्मफलानि जात्यायुर्भोगाः आफलविपाकाच्चित्तभूमौ शे
रत इत्याशया वासनाख्याः संस्काराः तैरपरामृष्टस्त्रिष्वपि कालेषु न संस्पृष्टः पुरुषविशेषः अन्येभ्यः पुरुषेभ्यो वि

शिष्यत इति विशेषः ईश्वरः ईशनशीलः इच्छामात्रेण सकलजगदुद्धरणक्षमः यद्यपि सर्वेषामात्मनां क्लेशादि
स्पर्शो नास्ति तथापि चित्तगतस्तेषामपदिश्यते यथा योद्धृगतौ जयपराजयौ स्वामिनः अस्य तु त्रिष्वपि कालेषु तथा
विधोऽपि क्लेशादिपरामर्शो नास्ति अतः स विलक्षण एव भगवानीश्वरः तस्य च तथाविधमैश्वर्यमनादेः सत्त्वोत्कर्षात्
सत्त्वोत्कर्षश्चास्य प्रकृष्टज्ञानादेव न चानयोर्ज्ञानैश्वर्ययोरितरेतराश्रयत्वं परस्परानपेक्षत्वात् ते द्वे ज्ञानैश्वर्ये ईश्वर
सत्त्वे वर्तमाने अनादिभूते तेन च तथाविधेन सत्त्वेन तस्यानादिरेव संबंधः प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्य
तिरेकेणानुपपत्तेः यथेतरेषां प्राणिनां सुखदुःखमोहतया परिणते चित्ते निर्मले सात्त्विके धर्मात्मप्रख्ये योगिशरीरे प्र
तिसंक्रान्ते चिच्छायासंक्रान्तेः संवेद्यं भवति नैवमीश्वरस्य तस्य च केवल एव सात्त्विकः परिणाम उत्कर्षवाननादिसंबं शिव
धेन भोग्यतया व्यवस्थितः अतः पुरुषान्तरविलक्षणतया स एवेश्वरः मुक्तात्मनां पुनः क्लेशादियोगस्तैस्तैः शास्त्रो ८
क्तैरुपायैर्निवर्तितः अस्य पुनः सर्वदैव तथात्वान्न मुक्तात्मतुल्यत्वं न चेश्वराणामनेकत्वं तेषां तुल्यत्वे भिन्नाभि

प्रायत्वात्कार्यस्यैवानुपपत्तिः उत्कर्षापकर्षत्वेन य एवोत्कृष्टः स एवेश्वरः तत्रैव काष्ठाप्राप्तत्वादीश्वरत्वस्य एवमी
श्वरस्य स्वरूपमभिधाय प्रमाणमाह तत्र निरतिशयं सर्वज्ञबीजं तस्मिन् भगवति सर्वज्ञत्वस्य यद्बीजं अतीतानाग
तादिग्रहणस्याल्पत्वं महत्त्वं च मूलत्वाद्बीजमिव बीजं तत्तत्र निरतिशयं काष्ठाप्राप्तं दृष्टा ह्यल्पत्वमहत्त्वादीनां ध
र्मिणां सातिशयानां काष्ठाप्राप्तिर्यथा परमाणावल्पत्वस्याकाशे परममहत्त्वस्य एवं ज्ञानादयोऽपि चित्तधर्मास्तारतम्येन
परिदृश्यमानाः क्वचिन्निरतिशयतामासादयन्ति यत्र चैते निरतिशयाः स ईश्वरः यद्यपि सामान्यमात्रेऽनुमानस्य पर्यव
सितत्वान्न विशेषावगतिः संभवति तथापि शास्त्रादस्य सर्वज्ञत्वादयो विशेषा अवगन्तव्याः तस्य स्वप्रयोजनाभावे कथं प्र
कृतिपुरुषयोः संयोगवियोगावापादयतीति नाशंकनीयं तस्य कारुणिकत्वाद्भूतानुग्रह एव प्रयोजनं कल्पप्रलयमहा
प्रलयेषु निःशेषान्संसारिण उद्धरिष्यामीति तस्याध्यवसायः यद्यस्येष्टं तत्तस्य प्रयोजनं एवमीश्वरस्य स्वरूपं प्रमा
णमभिधाय प्रभावमाह पूर्वेषामपि गुरुः कालेनानवच्छेदात् आद्यानां स्रष्टॄणां ब्रह्मादीनामपि स गुरुरुपदेष्टा य

नःसकालेननावच्छिद्यते अनादित्वात्तेषांपुनरादिमत्वादस्तिकालेनअवच्छेदः एवंप्रभावमुक्त्वोपासनोपयोगाय
वाचकमाह तस्यवाचकःप्रणवः इत्युक्तस्वरूपस्येश्वरस्यवाचकोभिधायकः प्रणवः ॐकारः तयोश्चवाच्यवाचकभाव
लक्षणःसंबंधोनित्यःसंकेतेनप्रकाश्यतेनतुकेनचित्क्रियतेयथापितापुत्रयोर्विद्यमानःसंबंधोस्यायंपितास्यायंपुत्रइतिके
नचित्प्रकाश्यते उपासनमाह तज्जपस्तदर्थभावनं तस्यसार्धत्रिमात्रस्यप्रणवस्यजपोयथावदुच्चारणंतद्वाच्यस्येश्वरस्यच
भावनंपुनःपुनश्चेतसिविनिवेशनंएकाग्रतायाउपाय अतःसमाधिसिद्ध्येयोगिनाप्रणवोजप्यस्तदर्थश्चभावनीयइत्युक्तं
भवति उपासनायाःफलमाह ततःप्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च तस्माज्जपात्तदर्थभावनाच्चयोगिनःप्रत्यक्
चेतनाधिगमोभवतिविषयप्रातिकूल्येनस्वांतःकरणाभिमुखमंचतियाचेतनादृक्शक्तिः साप्रत्यक्चेतनातस्याअधिग
मोज्ञानंभवति अंतरायावक्ष्यमाणास्तेषामभावःशक्तिप्रतिबंधोभवति अथकेंतरायाइत्याशंकायामाह व्याधिस्त्यान शिव
संशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वानवस्थितत्वानिचित्तविक्षेपास्तेंतरायाः नवैतेरजस्तमोवशात्

वर्त्तमानाश्चित्तस्यविक्षेपाभवंति तैरेकाग्रताविरोधिभिश्चित्तंविक्षिप्यतइत्यर्थः तत्रव्याधिर्धातुवैषम्यनिमित्तोज्वरादिः
स्त्यानमकर्मण्यताचित्तस्य उभयकोट्यालंबनंविज्ञानंसंशयःयोगःसाध्योनवेति प्रमादोऽननुष्ठानशीलतासमाधि
साधनेष्वौदासीन्यं आलस्यंकायचित्तयोर्गुरुत्वंयोगविषयेप्रवृत्त्यभावहेतुः अविरतिश्चित्तस्यविषयसंप्रयोगात्मागर्धः
भ्रांतिदर्शनंशुक्तिकायांरजतवद्विपर्ययज्ञानं अलब्धभूमिकत्वंकुतश्चिन्निमित्तात्समाधिभूमेरलाभःअसंप्राप्तिः अनव
स्थितत्वंलब्धायामपिसमाधिभूमौचित्तस्यतत्राप्रतिष्ठा एतेसमाधेरेकाग्रतायायथायोगंप्रतिपक्षत्वादंतरायाइत्यु
त्त च्यंते विक्षेपकारणकान्यान्यप्यंतरायान् प्रतिपादयितुमाह दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासाविक्षेपसह
भुवः कुतश्चिन्निमित्तादुत्पन्नेषुविक्षेपेषुएतेदुःखादयःप्रवर्त्तंते तत्रदुःखंचित्तस्यराजसःपरिणामोबाधनालक्षणः
यद्बाधाःप्राणिनस्तदपघातायप्रवर्त्तंते दौर्मनस्यंबाह्याभ्यंतरैःकारणैर्मनसोदौःस्थ्यं अंगमेजयत्वंसर्वांगीणोवेपथुरासन
मनःस्थैर्यस्यबाधकः प्राणोयद्बाह्यंवायुमाचामतिसश्वासः यत्कौष्ठ्यंवायुंनिःश्वसितिसप्रश्वासः तएतेविक्षेपैःसह

प्रवर्त्तमानायथोदिताभ्यासवैराग्याभ्यांनिरोद्धव्याइत्येषामुपदेशः सोपद्रवविक्षेपप्रतिषेधार्थमुपायांतरमाह तत्प्रति
षेधार्थमेकतत्वाभ्यासः तेषांविक्षेपाणांनिषेधार्थंएकस्मिन्कस्मिंश्चिदभिमतेतत्वेऽभ्यासश्चेतसः पुनःपुनर्विनिवे
शनंकुर्यात् यद्बलात्प्रत्युतायामेकाग्रतायांविक्षेपाःप्रशममुपयांति इदानींचित्तसंस्कारापादकंपरिकर्मकथन
मुपायांतरमाह मैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनं मैत्रीसौ
हार्दंकरुणाकृपामुदिताहर्षः उपेक्षाऔदासीन्यं एतायथाक्रमंसुखितेषु दुःखितेषुपुण्यवत्सुअपुण्यवत्सु
खि चविभावयेत् तथाहि सुखितेषुसाध्वेषांसुखित्वमितिमैत्रींकुर्यात् नत्वीर्ष्यांदुःखितेषुकथंनुनामैषांदुःखविमुक्तिः
स्यादितिकृपामेवकुर्यान्नताटस्थ्यं पुण्यवत्सुपुण्यानुमोदनेनहर्षंकुर्यात् नतुकिमेतेपुण्यवंतइतिविद्वेषं अपुण्य शिव
वत्सुचौदासीन्यमेवभावयेन्नानुमोदनं नद्वेषं सूत्रेसुखदुःखादिशब्दैस्तद्वंतःप्रतिपादिताः तदेवंमैत्र्यादिपरिकर्म ९
णाचित्तेप्रसीदतिसुखेनसमाधेराविर्भावोभवति परिकर्मचैतद्बाह्यंकर्मयथागणितेमिश्रकादिव्यवहारगणितंनि

ष्पत्तयेसंकलितादिकर्मोपकारकत्वेनप्रधानकर्मनिष्पत्तयेप्रभवति एवंद्वेषरागादिप्रतिपक्षभूतमैत्र्यादिभावनया
समुत्पादितप्रसादंचित्तंसंप्रज्ञातादिसमाधियोग्यंभवतिसंपद्यते रागद्वेषावेवमुख्यतयाविक्षेपमुत्पादयतः तौचे
त्समूलमुन्मूलितौस्यातांतदाप्रसन्नत्वान्मनसोभवत्येवैकाग्रता उपायांतरमाह प्रच्छर्दनविधारणाभ्यांवाप्राणस्य
प्रच्छर्दनंयत्कौष्ठ्यस्यवायोःप्रयत्नविशेषान्मात्राप्रमाणेनबहिर्निःसारणं विधारणंमात्राप्रमाणेनैवप्राणस्यायामोग
तिविच्छेदः सचद्वाभ्यांप्रकाराभ्यांबाह्यास्याभ्यंतरापूरणेनपूरितस्यवातत्रैवनिरोधेन तदेवंरेचकपूरककुंभकभेदेन
त्रिविधःप्राणायामश्चित्तस्यस्थितिमेकाग्रतयानिबध्नाति सर्वासामिंद्रियवृत्तीनांप्राणवृत्तिपूर्वकत्वान्मनःप्राणयो
श्च व्यापारेपरस्परमेकयोगक्षेमत्वाज्जीयमानःप्राणःसमस्तेंद्रियवृत्तिनिरोधद्वारेणचित्तस्यैकाग्रतायांप्रभवति स
मस्तदोषक्षयकारित्वंचास्यागमेश्रूयते॥ दोषकृताश्चसर्वेविक्षेपवृत्तयः॥ अतोदोषनिर्हरणद्वारेणाप्यस्यैकाग्रतायां
यं। सामर्थ्यं इदानीमुपायांतरदर्शनोपक्षेपेणसंप्रज्ञातस्यसमाधेःपूर्वरंगंकरोति विषयवतीवाप्रवृत्तिरुत्पन्नामनसःस्थि

तिनिबंधिनी मनसइतिवाक्यशेषः विषयागंधरसरूपस्पर्शशब्दाः तेविद्यंतेफलत्वेनयस्यांसाविषयवती प्रवृत्तिर्मन
सःस्थैर्यंकरोति॥तथाहि॥नासाग्रेचित्तंधारयतोदिव्यगंधसंविदुपजायते तादृश्येवजिह्वाग्रेरससंवित् ताल्वग्रेरू
पसंवित् जिह्वामध्येस्पर्शसंवित् जिह्वामूलेशब्दसंवित् तदेवं तत्तदिंद्रियद्वारेणतस्मिंस्तस्मिन्दिव्येविषये
जायमानासंवित् चित्तस्यैकाग्रतायाहेतुर्भवति अस्तियोगस्यफलमितियोगिनःसमाश्वासोत्पादनात् एवंविध
मेवोपायांतरमाह विशोकावाज्योतिष्मती प्रवृत्तिरुत्पन्नाचित्तस्यस्थितिनिबंधिनीतिवाक्यशेषः ज्योतिःशब्देनसा
त्विकःप्रकाशउच्यते सप्रशस्तोभूयानतिशयवांश्चविद्यतेयस्यांसाज्योतिष्मतीप्रवृत्तिः विशोकाविगतःसुखमयस
त्वाभ्यासवलात् शोकोरजःपरिणामरूपोयस्याःसाविशोकाचेतसःस्थितिनिबंधिनी अयमर्थःहृत्पद्मसंपुटमध्येप्र शिव
शांतकल्लोलक्षीरोदधिप्रख्यंचित्तसत्वंभावयतःप्रज्ञालोकात् सर्ववृत्तिपरिक्षयेचेतसःस्थैर्यमुत्पद्यते उपायांतरप्र १०
दर्शनद्वारेणसंप्रज्ञातस्यसमाधेर्विषयंदर्शयति वीतरागविषयंवाचित्तं मनसःस्थितिनिबंधनंभवतीतिवाक्यशेषः

वीतरागःपरित्यक्तविषयाभिलाषः तस्ययच्चित्तंपरिहृतक्लेशंतदालंबनीकृतंचेतसःस्थितिहेतुर्भवति एवंविधमे
वोपायांतरमाह स्वप्ननिद्राज्ञानालंबनंवा प्रत्यस्तमितबाह्येंद्रियवृत्तेर्मनोमात्रेणैवयत्रभोक्तृत्वमात्मनःसस्वप्नः
निद्राप्रूर्वमेवोक्तलक्षणा तदालंबनंस्वप्नालंबनंनिद्रालंबनंवाज्ञानमालंब्यमानंचेतसःस्थितिंकरोति नानारु
चित्वात्प्राणिनांयस्मिन्कस्मिंश्चिद्वस्तुनियोगिनःश्रद्धाभवतितस्यध्यानेनापिभवतीष्टसिद्धिरितिप्रतिपादयितुमा
ह यथाभिमतध्यानाद्वा यथाभिमतवस्तुनिबाह्येचंद्रादावाभ्यंतरेनाडीचक्रादौवाभाव्यमानेचेतःस्थिरीभवति
एवमुपायान् प्रदर्श्यफलप्रदर्शनार्थमाह परमाणुपरममहत्त्वांतोस्यवशीकारः एभिरुपायैश्चित्तस्थैर्यंभावयतोयो
गिनः सूक्ष्मविषयभावनाद्वारेणपरमाण्वंतोवशीकारः अप्रतिघातरूपोजायते क्वचित्परमाणुपर्यंतेसूक्ष्मेस्यम
नोनप्रतिहन्यतइत्यर्थः एवंस्थूलमाकाशादिपरममहत्पर्यंतंभावयतोनक्वचिच्चेतःप्रतिघातउत्पद्यते सर्वत्र
स्वातंत्र्यंभवतीत्यर्थः एवमेभिरुपायैःसंस्कृतस्यचेतसःकीदृक्रूपंभवतीत्याह क्षीणवृत्तेरभिजातस्येवमणेर्ग्रे

हीतृग्रहणग्राह्येषु तत्स्थतदंजनतासमापत्तिः क्षीणावृत्तयो यस्य तत्क्षीणवृत्ति तस्य ग्रहीतृग्रहणग्राह्येषु अ
स्मितेंद्रियविषयेषु तत्स्थतदंजनतासमापत्तिर्भवति तत्स्थत्वं तदेकाग्रता तदंजनता तन्मयत्वं न्यग्भूते चित्ते विष
यस्य भाव्यमानस्यैवोत्कर्षस्तथाविधा समापत्तिः तद्रूपपरिणामो भवतीत्यर्थः दृष्टांतमाह अभिजातस्येव मणेर्यथा
भिजातस्य निर्मलस्य स्फटिकमणेस्तत्तद्रूपाश्रयवशात्तत्तद्रूपापत्तिः एवं निर्मलस्य चित्तसत्वस्य तत्तद्भावनीयव
स्तूपरागात्तत्तद्रूपापत्ति यद्यपि ग्रहीतृग्रहणग्राह्येष्वित्युक्तं तथापि भूमिकाक्रमवशात् ग्राह्यग्रहणग्रहीतृष्वि
ति बोध्यं यतः प्रथमं ग्राह्यनिष्ठ एव समाधिस्ततो ग्रहणनिष्ठस्ततोस्मितामात्ररूपो ग्रहीतृनिष्ठः केवलस्य पुरुषस्य ग्रही
तुर्भाव्यत्वासंभवात् ततश्च स्थूलसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति एवं ग्रहणे ग्रहीतरि च समापन्नं तद्रूपप
रिणामत्वं बोद्धव्यं इदानीमुक्ताया एव समापत्तेश्चतुर्विधं भेदमाह शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः शिव
श्रोत्रेंद्रियग्राह्यः शब्दः स्फोटो वा शब्दः अर्थो जात्यादिः ज्ञानं सत्वप्रधाना बुद्धिवृत्ति विकल्प उक्तलक्षणः तैः संकीर्णा ११

यस्यामेते शब्दादयः परस्पराध्यासेन प्रतिभासंते गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानमित्यनेनाकारेण सा सवितर्का
समापत्तिरित्युच्यते उक्तलक्षणविपरीतां निर्वितर्कामाह स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का
शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानसत्वेन स्वरूपशून्या इव निर्वितर्का
समापत्तिः भेदांतरं प्रतिपादयितुमाह एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता एतयैव सवितर्क
या निर्वितर्कया च समापत्त्या सविचारा निर्विचारा च व्याख्याता कीदृशी सूक्ष्मविषया सूक्ष्मस्तन्मात्रेंद्रियादिर्विषयो
यस्याः सा तथोक्ता एतेन पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भवति सा हि महाभूतालंबना शब्दार्थविषयत्वेन
शब्दार्थविकल्परहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मार्थः प्रतिभाति यस्यां सा सविचारा देशकालधर्मादिर
हितो धर्मिमात्रतया सूक्ष्मार्थः तन्मात्रेंद्रियरूपः प्रतिभाति यस्यां सा निर्विचारा अस्या एव सूक्ष्मविषयायाः किं
पर्यंतः सूक्ष्मो विषय इत्याह सूक्ष्मविषयत्वं चालिंगपर्यवसानं सविचारनिर्विचारयोः समापत्त्योर्यत्सूक्ष्म

विषयत्वमुक्तंतदलिंगपर्यवसानं नक्वचिल्लीयतेनवाकिंचिल्लिंगतिगमयतीत्यलिंगंप्रधानंतत्पर्यंतंसूक्ष्मवि
षयत्वं॥ तथाहि॥ गुणानांपरिणामेचत्वारिपर्वाणि विशिष्टलिंगमविशिष्टलिंगंलिंगमात्रमलिंगंचेति विशिष्ट
लिंगंभूतानि अविशिष्टलिंगंतन्मात्रेंद्रियाणि लिंगमात्रंबुद्धिः अलिंगंप्रधानमिति नातःपरंसूक्ष्ममस्ती
त्युक्तंभवति एतासांसमापत्तीनांप्रकृतेयोजनमाह ताएवसबीजःसमाधिः ताएवोक्तलक्षणाःसमापत्तयः
सहबीजेनालंबनेनसहवर्त्ततइतिसबीजः संप्रज्ञातःसमाधिरित्युच्यते सर्वासामालंबनत्वात् अथेतरासांस
मापत्तीनांनिर्विचारफलत्वान्निर्विचारायाःफलमाह निर्विचारवैशारद्येअध्यात्मप्रसादः निर्विचारत्वंव्याख्यातं
वैशारद्यंनैर्मल्यं सवितर्कांस्थूलविषयामपेक्ष्यनिर्वितर्कायाःप्राधान्यं ततोपिसूक्ष्मविषयायाःसविचारायास्त शिव
तोपिनिर्विकल्पकरूपायानिर्विचारायास्तस्यास्तुनिर्विचारायाःप्रकृष्टाभ्यासवशाद्वैशारद्येनैर्मल्येसत्यध्यात्म १२
प्रसादःसमुपजायते चित्तंक्लेशवासनारहितंस्थिरप्रवाहयोग्यंभवति एतदेवचित्तस्यवैशारद्यंयत्स्थितौदार्ढ्यं॥

तस्मिन्सतिकिंभवतीत्याह ऋतंभरातत्रप्रज्ञा ऋतंसत्यंबिभर्तिकदाचिदपिनविपर्ययेणाच्छाद्यतेसाऋतंभरा
प्रज्ञातस्मिन्सतिभवतीत्यर्थः तस्माच्चप्रज्ञालोकात्सर्वंयथावत्पश्यन्योगीप्रकृष्टंयोगंप्राप्नोति अस्याःप्रज्ञां
तराद्वैलक्षण्यमाह श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशेषार्थत्वात् श्रुतमागमज्ञानं अनुमानमुक्तलक्षणं
ताभ्यांयाजायतेप्रज्ञासासामान्यविषया नहिशब्दलिंगयोरिंद्रियवद्विशेषप्रतिपत्तौसामर्थ्यं इयंपुनर्निर्विचा
रवैशारद्यसमुद्भवाप्रज्ञाताभ्यांविलक्षणा विशेषविषयत्वादस्यांहिप्रज्ञायांसूक्ष्मव्यवहितविप्रकृष्टानामवि
शेषःस्फुटेनैवरूपेणभासतेअतस्तस्यामेवयोगिनापरःप्रयत्नःकर्त्तव्यइत्युपदिष्टंभवति अस्याःप्रज्ञायाःफ
लमाह तज्जःसंस्कारोन्यसंस्कारप्रतिबंधी तयाप्रज्ञयाजनितोयःसंस्कारःसोन्यान्व्युत्थानजान्समाधिजां
श्चसंस्कारान्प्रतिबध्नाति स्वकार्यकरणाक्षमान्करोतीत्यर्थः यतस्तत्त्वरूपतयानयाजनिताःसंस्कारावलवत्त्वाद
तत्त्वरूपजनितान्संस्कारान्बाधितुंशक्नुवंति अतस्तामेवप्रज्ञामभ्यसेदित्युक्तंभवति एवंसंप्रज्ञातंसमाधि

मभिधायासंप्रज्ञातंवक्तुमाह तस्यापिनिरोधेसर्वनिरोधान्निर्बीजःसमाधिः तस्यसंप्रज्ञातस्यनिरोधेप्र
विलयेसतिसर्वासांचित्तवृत्तीनांस्वकारणेप्रविलयाद्यायासंस्कारमात्रात् वृत्तिरुदेतितस्यांतस्यांनेतिनेतिके
वलंपर्युदसनान्निर्बीजःसमाधिराविर्भवति यस्मिन्सतिपुरुषःस्वरूपनिष्ठःशुद्धोभवति तदत्राधिकृतस्ययो
गस्यलक्षणंचित्तवृत्तिनिरोधपदानांव्याख्यानं अभ्यासवैराग्यलक्षणंतस्योपायद्वयस्यस्वरूपंभेदंचाभिधा
यसंप्रज्ञातासंप्रज्ञातभेदेनयोगस्यमुख्यामुख्यभेदमुक्त्वायोगाभ्यासप्रदर्शनपूर्वकान्विस्तरेणोपायान्प्रदर्श्य
सुगमोपायप्रदर्शनतयेश्वरस्यस्वरूपप्रमाणप्रभाववाचकोपासनाक्रमतत्फलानिनिर्णीयचित्तस्यविक्षेपांस्त
त्सहभुवश्चदुःखादीन्विस्तरेणचतत्प्रतिषेधोपायानेकतत्त्वाभ्यासमैत्र्यादीन् प्राणायामादीनांसंप्रज्ञातासंप्र शिव
ज्ञातपूर्वंगभूतविषयवती प्रवृत्तिरित्यादीनाख्यायोपसंहारद्वारेणचसमापत्तीःसलक्षणाःफलसहिताःस्वस्व १२
विषयसहिताश्चोक्त्वासंप्रज्ञातासंप्रज्ञातयोरुपसंहारमभिधायसबीजपूर्वकोनिर्बीजःसमाधिरभिहितइ

तिव्याकृतोयोगपादः इतिमहाराजाधिराजश्रीभोजदेवविरचितायांपातंजलयोगशास्त्रसूत्रवृत्तौप्रथमःपा
दःसमाप्तः तेतेदुःप्रापयोगर्द्धिसिद्धयेयेनदर्शिताः उपायाःसजगन्नाथस्त्र्यक्षोस्तुप्रार्थितात्तये १ तदेवंप्रथ
मेपादेसमाहितचित्तस्यसोपायंयोगमभिधायव्युत्थितचित्तस्यापिकथमुपायाभ्यासपूर्वकोयोगःसात्म्यमुपयाती
तितत्साधनानुष्ठानप्रतिपादनायक्रियायोगमाह तपःस्वाध्यायेश्वरप्रणिधानानिक्रियायोगः तपःशास्त्रां
तरोपदिष्टंकृच्छ्रचांद्रायणादि स्वाध्यायःप्रणवपूर्वाणांमंत्राणांजपः ईश्वरप्रणिधानंसर्वक्रियाणांतस्मिन्
परमगुरौफलनिरपेक्षतयासमर्पणं एतानिक्रियायोगइत्युच्यते सकिमर्थइत्याह समाधिभावनार्थःक्लेश
तनूकरणार्थश्च क्लेशावक्ष्यमाणाःतेषांतनूकरणंस्वकार्यकरणप्रतिबंधः समाधिरुक्तलक्षणस्तस्यभावना
चेतसिपुनःपुनर्विनिवेशनंसोर्थःप्रयोजनंयस्यसतथोक्तः एतदुक्तंभवतिएतेतपःप्रभृतयोभ्यस्यमानाश्चि
त्तगतानविद्यादीन्क्लेशान्शिथिलीकुर्वंतःसमाधेरुपकारकतांभजंतेतस्मात्प्रथमतःक्रियायोगावधान

परेणयोगिनाभवितव्यमित्युपदिष्टं क्लेशतनूकरणार्थइत्युक्तंतत्रकेक्लेशाइत्याह अविद्यास्मितारागद्वेषाभि
निवेशाः क्लेशाः क्लेशाअविद्यादयोवक्ष्यमाणलक्षणाःपंचतेबाधनालक्षणंपरितापमुपजनयंतः क्लेश
शब्दवाच्याभवंतितेहिचेतसिप्रवर्त्तमानाःसंसारलक्षणंगुणपरिणामंदृढयंतिसत्यपिसर्वेषांतुल्येक्लेश
त्वेमूलभूतत्वादविद्यायाःप्राधान्यंप्रतिपादयितुमाह अविद्याक्षेत्रमुत्तरेषांप्रसुप्ततनुविच्छिन्नोदाराणां
अविद्यामोहः अनात्मन्यात्माभिमानइतियावत् साक्षेत्रंप्रसवभूमिरुत्तरेषामस्मितादीनांप्रत्येकंप्रसुप्तादि
भेदेनचतुर्विधानां अतोयत्राविद्याविपर्ययज्ञानरूपाशिथिलीभवतितत्रक्लेशानांनोद्भवोदृश्यतेविपर्ययज्ञा
नसद्भावेचतेषामुद्भवदर्शनात् स्थितमेवमूलत्वमविद्यायाः प्रसुप्ततनुविच्छिन्नोदाराणामिति तत्रयेक्ले शिव
शाश्चित्तभूमौस्थिताःप्रबोधकाभावेस्वकार्यंनारभंतेतेप्रसुप्ताइत्युच्यंते यथाबालावस्थायांबालस्यहि १४
वासनारूपेणस्थिताअपिक्लेशाःप्रबोधकसहकार्यभावेनव्यज्यंते तेतनवोयेस्वस्वप्रतिपक्षभावनयाशि

थिलीकृतकार्यसंपादनशक्तयोवासनावशेषतयाचेतस्यवस्थिताःप्रभूतांसामग्रीमंतरेणनस्वकार्यमारब्धुंक्षमाः
यथाभ्यासवतोयोगिनः तेविच्छिन्नायेकेनचिद्बलवताक्लेशेनाभिभूतशक्तयस्तिष्ठंति यथाद्वेषावस्थायांरा
गोरागावस्थायांद्वेषः नह्यनयोःपरस्परंविरुद्धयोर्युगपत्संभवोस्ति तेउदाराये प्राप्तसहकारिसन्निधयःस्वंस्वं
कार्यमभिनिर्वर्त्तयंति यथासदैवयोगपरिपंथिनोव्युत्थानदशायां एषांप्रत्येकंचतुर्विधानामपिमूलभूतत्वे
नस्थिताप्यविद्याअन्वयित्वेनप्रतीयते नहिक्वचिदपिक्लेशानांविपर्यासान्वयनिरपेक्षाणांस्वरूपमुपलभ्यते
तस्यांचमिथ्याभूतायांसम्यक्ज्ञानेननिवर्त्तितायांदग्धबीजकल्पानामेषांनक्वचित्प्ररोहोस्तीतिअविद्यानिमि
त्तत्वमविद्यान्वयश्चैषांनिश्चीयते अतःसर्वेप्यविद्याव्यपदेशभाजः सर्वेषांचक्लेशानांचित्तविक्षेपकारित्वा
द्योगिनाप्रथममेवतदुच्छेदेयत्नःकर्त्तव्यइति अविद्यायालक्षणमाह अनित्याशुचिदुःखानात्मसुनित्यशुचि
सुखात्मख्यातिरविद्या अतस्मिंस्तदितिप्रतिभासोऽविद्येत्यविद्यायाःसामान्यलक्षणं तस्याएवभेदप्रतिपाद

नं अनित्येषु घटादिषु नित्यत्वाभिमानोऽविद्येत्युच्यते एवमशुचिषु कायादिषु शुचित्वाभिमानः दुःखेषु च विषये
षु सुखत्वाभिमानः अनात्मनि शरीरे आत्मत्वाभिमानः एतेनापुण्ये पुण्यभ्रमो नर्थे चार्थभ्रमो व्याख्यातः अस्मि
तां लक्षयितुमाह दृग्दर्शनशक्त्योरेकात्मतेवास्मिता दृक्शक्तिः पुरुषः दर्शनशक्तिः रजस्तमोभ्यामनभिभूतः
सात्विकः परिणामोंतःकरणरूपः तयोर्भोग्यभोक्तृत्वेन जडाजडत्वेनात्यंतभिन्नरूपयोरेकताभिमानोऽस्मितेत्युच्य
ते यथा प्रकृतिर्वस्तुतः कर्तृत्वभोक्तृत्वरहितापि कर्त्र्यहं भोक्त्र्यहमित्यभिमन्यते सोयमस्मितारव्यो विपर्यासः क्ले
शः रागस्य लक्षणमाह सुखानुशयी रागः सुखमनुशेत इति सुखानुशायी सुखज्ञस्य सुखानुस्मृतिपूर्वकः सु
खसाधनेषु तृष्णारूपो गर्द्धो रागसंज्ञः क्लेशः द्वेषस्य लक्षणमाह दुःखानुशायी द्वेषः दुःखमुक्तलक्षणं तद शिव
भिज्ञस्य तदनुस्मृतिपूर्वकं तत्साधनेषु अनभिलषितोयोऽयं निंदात्मकः स द्वेषलक्षणः क्लेशः अभिनिवेशमाह १५
स्वरसवाही विदुषोपि तन्वनुबंधोऽभिनिवेशः पूर्वजन्मानुभूतमरणदुःखानुभववासनाबलाद्भयरूपः समु

पजायमानः शरीरविषयादिभिर्मम वियोगो माभूदित्यन्वहमनुबंधरूपः सर्वस्यैव क्रमेर्ब्रह्मपर्यंतं निमित्तं विनात्र
वर्त्तमानोऽभिनिवेशारव्यः क्लेशः तदेवं व्युत्थानस्य क्लेशात्मकत्वादेकाग्रताभ्यासेन प्रथमं क्लेशाः परिहर्त्तव्याः न
चाज्ञातानां तेषां परिहारः शक्यः कर्तुमिति तत्ज्ञानाय तेषामुद्देशं क्षेत्रं विभागं लक्षणं चाभिधाय स्थूलसूक्ष्मभे
दभिन्नानां तेषां प्रहाणोपायविभागमाह ते प्रतिप्रसवहेयाः सूक्ष्माः ते सूक्ष्माः क्लेशा ये वासनारूपेणावस्थिताः न
वृत्तिरूपं परिणाममारभंते ते प्रतिप्रसवेन प्रतिलोमपरिणामेन हेयास्त्यक्तव्याः स्वकारणास्मितायां कृतार्थं सवा
सनं चित्तं यदा प्रविष्टं भवति तदा कुतस्तेषां निर्मूलानां संभवः स्थूलानां हानोपायमाह ध्यानहेयास्तद्वृत्तयः
तेषां क्लेशानामारब्धकार्याणां याः सुखदुःखमोहात्मिका वृत्तयस्ता ध्यानेनैव चित्तैकाग्रतालक्षणेन हेयाः हातव्या
इत्यर्थः चित्तपरिकर्माभ्यासमात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति यथा वस्त्रादौ घनः स्थूलो मलः प्रक्षाल
नमात्रेणैव निवर्त्तते यस्तु तत्र सूक्ष्मः स तैस्तैरुपायैरुत्तापनप्रभृतिभिरेव निवर्त्तयितुं शक्यते एवं क्लेशानां

त्वमभिधायकर्माशयस्याभिधातुमाह क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः कर्माशय इत्यनेन तस्य स्व
रूपमभिहितं यतो वासनारूपाण्येव कर्माणि क्लेशमूल इत्यनेन कारणमभिहितं यतः कर्मणां शुभाशुभानां क्ले
शा एव निमित्तं दृष्टादृष्टजन्मवेदनीय इत्यनेन फलमुक्तं अस्मिन्नेव जन्मन्यनुभवनीयो दृष्टजन्मवेदनीयः
जन्मांतरानुभवनीयोऽदृष्टजन्मवेदनीयः॥ तथाहि॥ कानिचित्पुण्यानि कर्माणि देवताराधनादीनि तीव्रसंवेगे
न कृतानीहैव जन्मनि फलं जात्यायुर्भोगलक्षणं प्रयच्छंति यथा नंदीश्वरस्य भगवन्महेश्वराराधनबलादिहैव ज
न्मनि जात्यादयो विशिष्टाः प्रादुर्भूताः एवमन्येषां विश्वामित्रादीनां तपःप्रभावाज्जात्यायुषी केषांचिज्जातिरे
व यथा तीव्रसंवेगेन दुष्टकर्मकृतां नहुषादीनां जात्यंतरादिपरिणामः उर्वश्याश्च कार्तिकेयवने लतारूपतया शिव
एवं व्यस्तसमस्तरूपत्वेन यथायोगं योज्यं इदानीं कर्माशयस्य स्वभेदभिन्नं फलमाह सतिमूले तद्विपाको जात्या १६
युर्भोगः मूलमुक्तलक्षणाः क्लेशाः तेष्वनभिभूतेषु सत्सु कर्मणां कुशलाकुशलरूपाणां विपाकः फलं जात्या

युर्भोगा भवंती जातिर्मनुष्यत्वादिः आयुश्चिरकालं कायसंबंधः भोगा विषया इंद्रियाणि सुखसंविच्च कर्म
करणभावसाधनव्युत्पत्त्या भोगशब्दस्य इदमत्र तात्पर्यं चित्तभूमावनादिकालसंचिताः कर्मवासना यथा यथा पा
कमुपयांति तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं स्वकार्यमारभंते उक्तानां कर्मफलत्वेन जात्यादीनां
स्वकारणकर्मानुसारेण कार्यकर्तृत्वमाह ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ह्लादः सुखं परितापो दुःखं ह्ला
दपरितापौ फलं येषां ते तथोक्ताः पुण्यं कुशलं कर्म तद्विपरीतमपुण्यं ते पुण्यापुण्ये कारणे येषां तेषां भावस्तस्मात् एत
दुक्तं भवति पुण्यकर्मारब्धा जात्यायुर्भोगा ह्लादफलाः अपुण्यकर्मारब्धाः परितापफलाः एतच्च प्राणिमात्रापेक्षया
द्वैविध्यं योगिनस्तु सर्वं दुःखमित्याह परिणामतापदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः परिज्ञातक्ले
शादिविवेकस्य परिदृश्यमानं सकलमेव भोगसाधनं सविषान्नवत् दुःखमेव प्रतिकूलवेदनीयमेवेत्यर्थः यस्मादत्यं
ताभिजातो योगी दुःखलेशेनाप्युद्विजते यथाक्षिपात्रमूर्णातंतुस्पर्शमात्रेणैव महतीं पीडामनुभवति नेतरदंगं

तथाविवेकीस्वल्पमदुःखानुसंबंधेनापिविरज्यतेकथमित्याह परिणामतापसंस्कारदुःखैः विषयाणामुपभुज्यमाणी
नांयथायथंगर्द्धाभिवृद्धेस्तदप्राप्तिकृतस्यदुःखस्यापरिहार्यतयादुःखांतरसाधनत्वाच्चास्त्येवदुःखरूपतेतिपरिणा
मदुःखत्वं उपभुज्यमानेषुसुखसाधनेषुतत्प्रतिपंथिनंप्रतिद्वेषस्यसर्वदैवावस्थितत्वात्सुखानुभवकालेपितापदुःखं
दुःपरिहरमितितापदुःखता संस्कारदुःखत्वंस्वाभिमतानभिमतविषयसन्निधानेसुखसंविद्दुःखसंविच्चोपजायमा
नातथाविधमेवस्वक्षेत्रेसंस्कारमारभतेसंस्काराच्चपुनस्तथाविधसंविदनुभवइत्यपरिमितसंस्कारोत्पत्तिद्वारेणसंसारानु
च्छेदात्सर्वस्यैवदुःखत्वं गुणवृत्तिविरोधाच्चेति गुणानांसत्वरजस्तमसांयावृत्तयःसुखदुःखमोहरूपाःपरस्परम
भिभाव्याभिभावकत्वेनविरुद्धाजायंतेतासांसर्वत्रैवदुःखानुवेधाद्दुःखत्वं एतदुक्तंभवति ऐकांतिकीमात्यंतिकींच शिव
दुःखनिवृत्तिमिच्छतोविवेकिनउक्तरूपकारणचतुष्टयेयावत् सर्वेविषयादुःखरूपतयाप्रतिभांतितस्मात्सर्वकर्म १७
विपाकोदुःखरूपएवेत्युक्तंभवति तदेवमुक्तक्लेशकर्माशयविपाकराशेरविद्याप्रभवत्वादविद्यायाश्चमिथ्याज्ञा

नरूपतयासम्यक्ज्ञानोच्छेद्यत्वात्सम्यक्ज्ञानस्यचसाधनहेयोपादेयावधारणरूपत्वात्तदभिधानायाह हेयंदुःख
मनागतं भूतस्यव्यतिक्रांतत्वादनुभूयमानस्यचत्यक्तुमशक्यत्वादनागतमेवसंसारदुःखंहातव्यमित्युक्तमिति हेय
हेतुमाह द्रष्टृदृश्ययोःसंयोगोहेयहेतुः द्रष्टाचिद्रूपःपुरुषःदृश्यंबुद्धितत्वं तयोर्विवेकाख्यातिपूर्वकोयोसौसंयो
गोभोग्यभोक्तृत्वेनसंनिधानंसहेयस्यदुःखस्यगुणपरिणामस्यसंसारस्यहेतुःकारणं तन्निवृत्त्यासंसारनिवृत्तिर्भव
तीत्यर्थः द्रष्टृदृश्ययोःसंयोगइत्युक्तंतत्रदृश्यस्वरूपंकार्यंप्रयोजनंचाह प्रकाशक्रियास्थितिशीलंभूतेंद्रियात्मकं
भोगापवर्गार्थंदृश्यं प्रकाशःसत्वस्यधर्मः क्रियाप्रवृत्तिरूपारजसः स्थितिर्नियमरूपातमसः ताःप्रकाशक्रियास्थि
तयःशीलंस्वाभाविकंरूपंयस्यतत्तथाविधमितिरूपमस्यनिर्दिष्टं भूतेंद्रियात्मकमितिभूतानिस्थूलसूक्ष्मभे
देनपृथिव्यादीनिगंधतन्मात्रादीनिच इंद्रियाणिबुद्धींद्रियकर्मेंद्रियांतःकरणभेदेनत्रिविधानिउभयमेतद्ग्राह्य
ग्रहणरूपमात्मास्वरूपाभिन्नःपरिणामोयस्यतत्तथाविधमित्यनेनकार्यमस्योक्तं भोगःकथितलक्षणः अपव

गोविवेकख्यातिपूर्वकासंसारनिवृत्तिः तौभोगापवर्गावर्थःप्रयोजनंयस्यतत्तथाविधंदृश्यमित्यर्थः तस्यचदृश्य
स्यनानावस्थारूपपरिणामात्मकस्यहेयत्वेनज्ञातव्यत्वादवस्थाःकथयितुमाह विशेषाविशेषलिंगमात्रालिंगा
निगुणपर्वाणि गुणानांपर्वाण्यवस्थाविशेषाश्चत्वारोज्ञातव्याइत्युपदिष्टंभवति तत्रविशेषामहाभूतेंद्रियाणि
अविशेषास्तन्मात्रांतःकरणे लिंगमात्रंबुद्धिः। अलिंगमव्यक्तमित्युक्तं सर्वत्रगुणरूपस्याव्यक्तस्यान्वयित्वेनप्र
त्यभिज्ञानादवश्यंज्ञातव्यत्वेनयोगकालेचत्वारिपर्वाणिनिर्दिष्टानि एवंहेयत्वेनदृश्यंप्रथमंज्ञातव्यत्वादवस्थासहि
तंव्याख्यायोपादेयंद्रष्टारंव्याकर्तुमाह द्रष्टादृशिमात्रःशुद्धोपिप्रत्ययानुपश्यः द्रष्टापुरुषोदृशिमात्रश्चेतनामात्रः
मात्रग्रहणंधर्मधर्मिनिरासार्थं केचिद्धिचेतनामात्मनोधर्ममिच्छंति सशुद्धोपिपरिणामित्वाद्यभावेनस्वप्रतिष्ठो
पिप्रत्ययानुपश्यः प्रत्ययाःविषयोपरक्तानिज्ञानानितानिअनुअव्यवधानेनप्रतिसंक्रमाद्यभावेनपश्यति एतदु शिव
क्तंभवति जातविषयोपरागायामेवबुद्धौसन्निधानमात्रेणैवपुरुषस्यद्रष्टृत्वमिति सएवभोक्तेत्याह तदर्थएव १८

दृश्यस्यात्मा दृश्यस्यप्रागुक्तलक्षणस्यआत्मायत्स्वरूपंसतदर्थःतस्यपुरुषस्यभोक्तृत्वसंपादनंनामस्वार्थपरिहारेण
प्रयोजनं नहिप्रधानंप्रवर्तमानमात्मनःकिंचित्प्रयोजनमपेक्ष्यप्रवर्त्ततेकिंतुपुरुषस्यभोगंसंपादयामीति यद्येवंपुरु
षस्यभोगसंपादनमेवप्रयोजनंतदासंपादितेतस्मिंस्तन्निःप्रयोजनंविरतव्यापारंस्यात् तस्मिंश्चपरिणामशून्येशुद्ध
त्वात्सर्वेद्रष्टारोबंधरहितास्युःस्ततश्चसंसारोच्छेदइत्याशंक्याह कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वात् य
द्यपिविवेकख्यातिपर्यंताद्भोगसंपादनात्कमपिकृतार्थंपुरुषंप्रतितन्नष्टंविरतव्यापारंतथापिसर्वपुरुषसाधारणत्वा
दन्यान्प्रत्यनष्टव्यापारमवतिष्ठतेअतःप्रधानस्यसकलभोक्तृसाधारणत्वान्नकदाचनापिविनाशः एकस्यमुक्तौ
वानसर्वेषांमुक्तिप्रसंगइत्युक्तंभवति दृश्यद्रष्टारौव्याख्यायसंयोगंव्याख्यातुमाह स्वस्वामिशक्त्योःस्वरूपोपलब्धि
हेतुःसंयोगः कार्यद्वारेणास्यलक्षणंकरोति स्वशक्तिर्दृश्यस्यस्वभावःस्वामिशक्तिर्द्रष्टुःस्वरूपं तयोर्द्वयोरपिसंवेद्य
संवेदकत्वेनव्यवस्थितयोर्यास्वरूपोपलब्धिःतस्याःकारणंयःससंयोगः सचसहजभोग्यभोक्तृभावस्वरूपान्नान्यः
नहितयोर्नित्ययोर्व्यापकयोश्चस्वरूपादतिरिक्तःकश्चित्संयोगः यदेवभोग्यस्यभोग्यत्वंभोक्तुश्चभोक्तृत्वमनादि

सिद्धं स एव संयोगः तस्यापि कारणमाह तस्य हेतुरविद्या यापूर्वं विपर्यासात्मिका मोहरूपा अविद्याव्याख्याता सा
तस्य विवेकाख्यातिरूपस्य संयोगस्य कारणं हेयं हानक्रियाकर्मोच्यते किं पुनस्तज्ज्ञानमित्याह तदभावात्संयोगाभावो हानं
तत् दृशेः कैवल्यं तस्या अविद्यायाः स्वरूपविरुद्धेन सम्यक् ज्ञानेनोन्मूलितायायोयमभावस्तस्मिन् सति तत्कार्यस्य
संयोगस्याभावस्तज्ज्ञानमित्युच्यते अयमर्थो नैतस्य मूर्तद्रव्यवत्परित्यागो युज्यते किंतु जातायां विवेकख्यातावविवि
वेकनिमित्तः संयोगः स्वयमेव निवर्त्तत इति इति तस्य हानं यदेव संयोगस्य हानं तदेव नित्यं केवलस्यापि पुरुषस्य कैवल्यं
व्यपदिश्यते तदेवं संयोगस्य स्वरूपं कारणं कार्यं चाभिहितं अथ हानोपायकथनद्वारेणोपादेयकारणमाह विवेकख्यातिर
विप्लवा हानोपायः अन्ये गुणा अन्यः पुरुष इत्येवंविधस्य विवेकस्य ख्यातिः प्रख्या सा हानस्य दृश्यपरित्यागस्योपायः का
रणं कीदृशी अविप्लवा न विद्यते विप्लवो विच्छेदो ऽन्तरान्तरा व्युत्थानरूपो यस्याः सा अविप्लवा इदमत्र तात्पर्यं प्रतिपक्षभा शिव
वनाबलादविद्याप्रविलये विनिवृत्तज्ञातृत्वकर्तृत्वाभिमानाया रजस्तमोमलानभिभूताया बुद्धेरन्तर्मुखाया याश्चिच्छा १९
यासंक्रांतिः सा विवेकख्यातिरित्युच्यते तस्यां चिरसंततत्वेन प्रवृत्तायां दृश्यस्याधिकारनिवृत्तेर्भवत्येव कैवल्यं उत्प

न्नविवेकख्यातेः पुरुषस्य यादृशी प्रज्ञा भवति तां कथयन्विवेकख्यातेरेव स्वरूपमाह तस्य सप्तधा प्रान्तभूमिः प्रज्ञा तस्योत्पन्न
विवेकज्ञानस्य ज्ञातव्यविवेकरूपा प्रज्ञा प्रान्तभूमौ सकलसालंबनसमाधिभूमिपर्यन्ते सप्तप्रकारा भवति तत्र कार्यविमुक्ति
रूपा चतुःप्रकारा ज्ञातं मया ज्ञेयं न ज्ञातव्यं किंचिदस्ति क्षीणा मे क्लेशाः न मे किंचित् क्षेत्यमस्ति अधिगतं मया ज्ञानं प्राप्ता मया
विवेकख्यातिरिति प्रत्ययांतरपरिहारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते ईदृशी प्रज्ञा कार्यविषयं निर्मलं ज्ञानं कार्यविमु
क्तिरित्युच्यते चित्तविमुक्तिस्त्रिधा चरितार्था मे बुद्धिः गुणा हताधिकाराः गिरिशिखरनिपतिता इव ग्रावाणः न पुनः स्थितिं
यास्यन्ति स्वकारणे प्रलयाभिमुखानां मोहाभिधानमूलकारणाभावान्निःप्रयोजनत्वाच्चामीषां कुतः प्ररोहः सात्मीभूतश्च
मे समाधिः तस्मिन् सति स्वरूपप्रतिष्ठोहमिति ईदृशी त्रिप्रकारा चित्तविमुक्तिः तदेवमीदृश्यां सप्तविधप्रान्तभूमिप्रज्ञाया
मुपजातायां पुरुषः कुशल इत्युच्यते विवेकख्यातिः संयोगाभावहेतुरित्युक्तं तस्यास्तूत्पत्तौ किं निमित्तमित्यत आह योगां
गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः योगांगानि वक्ष्यमाणानि तेषामनुष्ठानात् ज्ञानपूर्वकादभ्यासात् आ
विवेकख्यातेरशुद्धिक्षये चित्तसत्वस्य प्रकाशावरणलक्षणक्लेशरूपाशुद्धिक्षये या। ज्ञानदीप्तिस्तारतम्येन सात्विकः परि

णामो विवेकख्यातिपर्यन्तः स तस्याः ख्यातेर्हेतुरित्यर्थः योगाङ्गानुष्ठानादशुद्धिक्षय इत्युक्तं कानि पुनस्तानि योगाङ्गानी
ति तेषामुद्देशमाह यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि इह कानिचित्समाधेः साक्षा
दुपकारकत्वेनान्तरङ्गाणि यथा धारणादीनि कानिचित्प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधेरुपकुर्व
न्ति यथा यमनियमादयः तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं यथा सत्यासनजये प्राणायामस्थैर्यं एवमुत्तरत्रापि यो
ज्यं क्रमेणैषां स्वरूपमाह अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा सा च
सर्वानर्थहेतुः तदभावोऽहिंसा हिंसायाः सर्वकालमेव परिहार्यत्वात्प्रथमं तदभावरूपाया अहिंसाया निर्देशः सत्यं
वाङ्मनसोर्यथार्थत्वं स्तेयं परस्वापहरणं तदभावोऽस्तेयं ब्रह्मचर्यमुपस्थसंयमः अपरिग्रहो भोगसाधनानामस्वी
करणं तएहिंसादयः पञ्च यमशब्दवाच्या योगाङ्गत्वेन निर्दिष्टाः एषां विशेषमाह जातिदेशकालसमयानवच्छिन्नाः शिव
सार्वभौमा महाव्रतं जातिर्ब्राह्मणत्वादिः देशस्तीर्थादिः कालश्चतुर्दश्यादिः समयो ब्राह्मणादिप्रयोजनादिः ए २०
तैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिंसादयो यमाः सर्वासु क्षिप्तादिषु चित्तभूमिषु भवा महाव्रतमित्युच्यते तद्य

था ब्राह्मणं न हनिष्यामि तीर्थे किंचन न हनिष्यामि चतुर्दश्यां न हनिष्यामि देवब्राह्मणाद्यर्थव्यतिरेकेण न हनिष्यामीति
एवं चतुर्विधावच्छेदव्यतिरेकेण किंचित् क्वचित् कदाचित् कस्मिंश्चिदप्यर्थे न हनिष्यामीत्यनवच्छिन्नाः एवं सत्यादिषु य
थायोगं योज्यं इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यते न पुनः परिधारणे नियमानाह शौचसंतोषतपःस्वा
ध्यायेश्वरप्रणिधानानि नियमाः शौचं द्विविधं बाह्यमाभ्यन्तरं च बाह्यं मृज्जलादिभिः कायप्रक्षालनं आन्तरं मैत्र्यादिभिश्चि
त्तमलानां प्रक्षालनं संतोषस्तुष्टिः शेषाः प्रागेव कृतव्याख्यानाः एते शौचादयो नियमशब्दवाच्याः कथमेषां योगाङ्ग
त्वमित्यत आह वितर्कबाधने प्रतिपक्षभावनं वितर्क्यन्त इति वितर्काः योगप्रतिपन्थिनो हिंसादयः तेषां प्रतिपक्षभा
वने सति यदि बाधा भवति तदा योगः सुकरो भवतीति भवत्येव यमनियमानां योगाङ्गत्वं इदानीं वितर्काणां स्वरूपभेदप्र
कारं फलं च क्रमेणाह वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञा
नानन्तफला इति प्रतिपक्षभावनं एते पूर्वोक्ता हिंसादयः प्रथमं त्रिधा भिद्यन्ते कृतकारितानुमोदनभेदेन तत्र स्वयं नि
ष्पादिताः कृताः कुरु कुर्विति प्रयोजकव्यापारेण समुत्पादिताः कारिताः अन्येन क्रियमाणाः साध्वित्यङ्गीकृता अ

नुमोदिताः एतच्च त्रैविध्यं परस्परव्यामोहनिवारणायोच्यते अन्यथा मंदमतिरेवं मन्येत न मया स्वयं हिंसा कृतेति ना
स्ति मे दोष इति एषां कारणप्रतिपादनायाह लोभक्रोधमोहपूर्वका इति यद्यपि लोभः प्रथमं निर्दिष्टस्तथापि स
र्वक्लेशानां मोहस्यानात्मनि आत्माभिमानलक्षणस्य निदानत्वात्तस्मिन्सति स्वपरविभागपूर्वकत्वे लोभक्रोधादीना
मुद्भवात्मूलत्वमवसेयं मोहपूर्विकाः सर्वा दोषजातिरित्यर्थः लोभस्तृष्णा क्रोधः कृत्याकृत्यविवेकोन्मूलकः
प्रज्वलनात्मकश्चित्तधर्मः प्रत्येकं कृतादिभेदेन त्रिःप्रकारा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यंते ते
षामेव पुनरवस्थाभेदेन त्रैविध्यमाह मृदुमध्याधिमात्राः मृदवो मंदाः मध्या न मंदा नापि तीव्राः अधिमात्रास्ती
व्राः इति नव भेदाः इत्थं त्रैविध्ये सति सप्तविंशतिः मृद्वादीनामपि प्रत्येकं मृदुमध्याधिमात्रभेदात् त्रैविध्यं सं
भवति तद्यथा योगं योज्यं ॥ तद्यथा ॥ मृदुमृदुर्मृदुमध्यो मृदुतीव्र इति एषां फलमाह दुःखाज्ञानानंतफलाः शिव
दुःखं प्रतिकूलतया वभासमानो राजसश्चित्तधर्मः अज्ञानं मिथ्याज्ञानं संशयविपर्ययरूपं ते दुःखाज्ञानेऽनंत २१
मपरिच्छिन्नं फलं येषां ते तथोक्ताः इत्थं तेषां स्वरूपकारणादिभेदेन ज्ञातानां प्रतिपक्षभावनया योगिना

परिहारः कर्तव्य इत्युपदिष्टं भवति एषामभ्यासात्प्रकर्षमागच्छतामनुनिष्पादिन्यः सिद्धयो यथा भवंति तथा क्रमेण
प्रतिपादयितुमाह तत्सन्निधौ वैरत्यागः तस्याहिंसां भावयतः सहजविरोधिनामप्यहिनकुलादीनां वैरत्यागो निर्मत्स
रतयावस्थानं भवति हिंसारता हिंस्रत्वं परित्यजंतीत्यर्थः सत्याभ्यासवतः किं भवतीत्याह सत्यप्रतिष्ठायां क्रियाफला
श्रयत्वं क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छंति तस्य तु सत्याभ्यासवतो योगिनः तथा सत्यं प्रकृष्य
ते यथा अकृतायामपि क्रियायां योगी फलमाप्नोति तद्वचनाद्यस्य कस्यचित् क्रियामकुर्वतोपि क्रियाफलं भवतीत्य
र्थः अस्तेयाभ्यासवतः फलमाह अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं अस्तेयं यदाभ्यसति योगी तदा तस्य प्रकर्षान्नि
रभिलाषस्यापि सर्वतो दिव्यानि रत्नान्युपतिष्ठंते ब्रह्मचर्याभ्यासस्य फलमाह ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः
यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षान्निरतिशयं वीर्यं सामर्थ्यमाविर्भवति वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्र
कर्षात्शरीरेंद्रियमनःसु वीर्यं प्रकर्षमागच्छति अपरिग्रहाभ्यासस्य फलमाह अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः
कथमित्यस्य भावः कथंता जन्मनः कथंता तस्याः संबोधः सम्यक् ज्ञानं जन्मांतरे कोहमासं कीदृशः किंकार्यकारीति

जिज्ञासोसर्वमेवसम्यक्जानातीत्यर्थः नकेवलंभोगसाधनपरिग्रहएवपरिग्रहः यावतात्मनःशरीरपरिग्रहोपि
परिग्रहः भोगसाधनत्वाच्छरीरस्य तस्मिन्सतिरागानुबंधाद्बहिर्मुखायामेवप्रवृत्तौननात्त्विकज्ञानप्रादुर्भावः
यदापुनःशरीरादिपरिग्रहनैरपेक्षेणमाध्यस्थ्यमवलंबतेतदामध्यस्थस्यरागादित्यागात्सम्यक्ज्ञानहेतुर्भव
त्येवपूर्वापरजन्मसंबोधः उक्तायमानांसिद्धयः अथनियमानामाह शौचात्स्वांगजुगुप्सापरैरसंसर्गः यःशौचं
भावयतितस्यस्वांगेष्वपिकारणस्वरूपपर्यालोचनद्वारेणजुगुप्साघृणासमुपजायते अशुचिरयंकायोनात्राग्रहः
कर्तव्यइत्यमुनैवहेतुनापरैरन्यैश्चकायवद्भिरसंसर्गःसंसर्गाभावःसंसर्गपरिवर्जनमित्यर्थः यःकिलस्वमेवकायं
जुगुप्सतेतत्तदवद्यदर्शनात्सकथंपरकीयैस्तथाभूतैःकायैःसंसर्गमनुभवति शौचस्यैवफलांतरमाह सत्वशुद्धिसौम शिव
नस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानिच भवंतीतिवाक्यशेषः सत्वंप्रकाशसुखाद्यात्मकंतस्यशुद्धिःरजस्तमो २२
भ्यामनभिभवः सौमनस्यंखेदाननुभवेनमानसीप्रीतिः एकाग्रतानियतेंद्रियविषयेचेतसःस्थैर्यं इंद्रियाणांज
योविषयपराङ्मुखानामिंद्रियाणांस्वात्मन्यवस्थानं आत्मदर्शनेविवेकख्यातिरूपेचित्तस्ययोग्यत्वं समर्थत्वं शौ

चाभ्यासवतःएतेसत्वशुद्ध्यादयःक्रमेणप्रादुर्भवंति॥तथाहि॥सत्वशुद्धेःसौमनस्यंसौमनस्यादिंद्रियजयः इंद्रियजया
दात्मदर्शनयोग्यतेति संतोषाभ्यासस्यफलमाह संतोषादनुत्तमःसुखलाभः संतोषप्रकर्षेणयोगिनस्तथाविधमांतरं
सुखमाविर्भवति यस्यबाह्यविषयसुखंशतांशेनापिनसमं तपसःफलमाह कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः
तपःसमभ्यस्यमानंचेतसःक्लेशादिलक्षणाशुद्धिक्षयद्वारेणकायेंद्रियाणांसिद्धिमुत्कर्षमादधाति अयमर्थः चांद्रा
यणादिनाचित्तक्लेशक्षयः तत्क्षयादिंद्रियाणांसूक्ष्मव्यवहितविप्रकृष्टदर्शनादिसामर्थ्यमाविर्भवति कायस्ययथेच्छ
मणुमहत्त्वादीनि स्वाध्यायस्यफलमाह स्वाध्यायादिष्टदेवतासंप्रयोगः अभिप्रेतमंत्रजपादिलक्षणेस्वाध्यायेप्रकृ
ष्यमाणेयोगिनइष्टयाभिप्रेतयादेवतयासंप्रयोगोभवति सादेवताप्रत्यक्षाभवतीत्यर्थः ईश्वरप्रणिधानस्यफल
माह समाधिसिद्धिरीश्वरप्रणिधानात् ईश्वरेयोयंभक्तिविशेषःतस्मात्समाधेरुक्तलक्षणस्याविर्भावोभवति य
स्मात्सभगवानीश्वरःप्रसन्नःसन्नंतरायरूपान्क्लेशानपहृत्यसमाधिमुद्बोधयति यमनियमानुक्त्वासनमाह
स्थिरसुखमासनं आस्यतेनेनेत्यासनं पद्मासनदंडासनस्वस्तिकासनादि तद्यदास्थिरंनिष्कंपंसुखंअनुद्वेजनी

स्य स्य

र्यं भवति तदा तद्योगांगतां भजते तस्यैव स्थिरसुखत्वार्थमुपायमाह प्रयत्नशैथिल्यानंतसमापत्तिभ्यां तदासनं प्र
यत्नशैथिल्येनानंते समापत्त्या च स्थिरं सुखं भवतीति संबंधः यदा यदासनं बध्नामीतीच्छां करोति प्रयत्नशैथिल्येप्य
क्लेशेनैव तदासनं निष्पद्यते यदा आकाशादिगत आनंत्ये चेतसः समापत्तिः क्रियते अवधानेन तादात्म्यमाप
द्यते तदा देहाहंकाराभावान्नासनं दुःखजनकं भवति अस्मिंश्चासनजये सति समाध्यंतरायभूताः न प्रभवंत्यंग
मेजयत्वादयः तस्यैवानुनिष्पादि फलमाह ततो द्वंद्वानभिघातः तस्मिन्नासनजये सति द्वंद्वैः शीतोष्णक्षु
त्तृष्णादिभिर्योगी नाभिहन्यत इत्यर्थः आसनजयादनंतरं प्राणायाममाह तस्मिन्सति श्वासप्रश्वासयोर्गतिवि
च्छेदः प्राणायामः आसने स्थैर्ये सति तन्निमित्तकः प्राणायामलक्षणो योगांगविशेषोनुष्ठेयो भवति कीदृशः श्वा
सप्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वासावुक्तलक्षणौ तयोस्त्रिधा रेचनाक्षेपणपूरणद्वारेण बाह्याभ्यं
तरेषु स्थानेषु गतेः प्रवाहस्य विच्छेदो धारणं प्राणायाम उच्यते तस्यैव सुखावगमाय विभज्य स्वरूपं कथयति स
तु बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः बाह्यवृत्तिः श्वासो रेचकः अंतर्वृत्तिः शिव २३

श्वासः पूरकः अंतस्तंभवृत्तिः कुंभकः तस्मिन् जलमिव कुंभे निश्चलतया प्राणा अवस्थाप्यंत इति कुंभकः त्रिविधोयं
प्राणायामो देशेन कालेन संख्यया चोपलक्षितो दीर्घसूक्ष्मसंज्ञो भवति देशेनोपलक्षितो यथा नासाद्वादशांतादौ
नासामारभ्य द्वादशांगुलपर्यंतमित्यर्थः कालेनोपलक्षितो यथा षट्त्रिंशन्मात्रादिप्रमाणः संख्ययोपलक्षितो
यथा इयतो वारान् कृत एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातो भवति इत्येतज्ज्ञानाय संख्याग्रहणमुपात्तं उ
द्घातो नाभिमूलात् प्रेरितस्य वायोः शिरस्यभिहननं त्रीन् प्राणायामानभिधाय चतुर्थमभिधातुमाह बाह्याभ्यं
तरविषयाक्षेपी चतुर्थः प्राणस्य बाह्यो विषयो द्वादशांतादिः आंतरो विषयो हृदयनाभिचक्रादिः तौ द्वौ विषयौ
आक्षिप्य पर्यालोच्य यस्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायामः तृतीयस्मात्कुंभकाख्यादयमस्य विशेषः स
बाह्याभ्यंतरौ विषयावपर्यालोच्यैव सहसा तप्तोपलनिपतितजलन्यायेन युगपत्स्तंभवृत्त्या निष्पद्यते अस्य तु
विषयद्वयाक्षेपको निरोधः अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यः चतुर्विधस्यास्य फलमाह
ततः क्षीयते प्रकाशावरणं ततस्तस्मात्प्राणायामात्प्रकाशस्य चित्तसत्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयते विनश्य

तीत्यर्थः फलांतरमाह धारणासु च योग्यता मनसः धारणा वक्ष्यमाणाः तासु प्राणायामैः क्षीणदोषं मनो यत्र
यत्र धार्यते तत्र तत्र स्थिरं भवति न विक्षेपं भजते प्रत्याहारस्य लक्षणमाह स्वविषयासंप्रयोगे चित्तस्य स्वरूप
पानुकार इवेंद्रियाणां प्रत्याहारः इंद्रियाणि स्वस्वविषयेभ्यः प्रतीपमाह्रियंते स्मिन्निति प्रत्याहारः स च कथं नि
ष्पद्यत इत्याह चक्षुरादीनामिंद्रियाणां स्वः स्वो विषयो रूपादिस्तेन संप्रयोगस्तदाभिमुख्येन वर्त्तनं तदभावस्तदा
भिमुख्यपरित्यज्य स्वरूपमात्रे वस्थानं तस्मिन् सति चित्तस्वरूपमात्रानुकारीणींद्रियाणि भवंति यतश्चित्तमनुव
र्त्तमानानि मधुकरराजमिव मधुकमक्षिकाः सार्वाणींद्रियाणि प्रतीयंते अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंति
तेषां तत्स्वरूपाकारः प्रत्याहार उक्तः प्रत्याहारफलमाह ततः परमा वश्यतेंद्रियाणां अभ्यस्यमाने हि प्रत्याहारे
तथा वश्यान्यायत्तानींद्रियाणि संपद्यंते यथा बाह्यविषयाभिमुख्यतां नीयमानान्यपि न यांतीत्यर्थः तदेवं प्रथमपादो
दोक्तलक्षणस्य योगस्यांगभूतं क्लेशतनूकरणफलं क्रियायोगमभिधाय क्लेशानामुद्देशं स्वरूपं कारणं क्षेत्रं फलं चो २४
क्त्वा कर्मणामपि भेदं कारणं स्वरूपं फलं चाभिधाय विपाकस्य स्वरूपं कारणं चाभिहितं ततस्त्याज्यत्वात्क्लेशादीनां

ज्ञानव्यतिरेकेण त्यागस्याशक्यत्वात् ज्ञानस्य च शास्त्रायत्तत्वाच्छास्त्रस्य च हेयहेयकारणोपादेयोपादानकारणत्वेन च
तुर्व्यूहत्वाद्धेयस्य च हानव्यतिरेकेण स्वरूपानिष्पत्तेः हानसहितं चतुर्व्यूहं स्वस्वकारणसहितं अभिधायोपादानकारण
भूताया विवेकख्यातेः कारणभूतानामंतरंगबहिरंगभावेन स्थितानां योगांगानां यमादीनां स्वरूपं फलसहितं व्याकृत्य धा
रणापर्यंतानां वासनापर्यंतानां परस्परमुपकार्योपकारकभावेनावस्थितानामुद्देशमभिधाय परस्परलक्षणपूर्वकं फल
मभिहितं तदयं योगो यमनियमादिभिः प्राप्तबीजभावः आसनप्राणायामैरंकुरितः प्रत्याहारेण कुसुमितो ध्यानधार
णासमाधिभिः फलिष्यतीति व्याख्यातः साधनपादः इति श्रीराजाधिराजभोजदेवविरचितायां राजमार्तंडाभिधाना
यां पातंजलयोगशास्त्रवृत्तौ द्वितीयः साधनपादः समाप्तः यत्पादपद्मस्मरणादणिमादिविभूतयः भवंति भाविनाम
स्तु भूतनाथः स भूतये १ तदेवं पूर्वोद्दिष्टं धारणाद्यंगत्रयं निर्णेतुं संयमसंज्ञाभिधानपूर्वं बाह्याभ्यंतरादिसिद्धिप्रतिपा
दनाय लक्षयितुमुपक्रमते तत्र धारणायाः स्वरूपमाह देशबंधश्चित्तस्य धारणा देशे नाभिचक्रनासाग्रादौ चित्तस्य
बंधो विषयांतरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणेत्युच्यते अयमर्थो मैत्र्यादिचित्तपरिकर्मवासितांतःकरणे

नयमनियमवतोजितासनेनपरिहृतप्राणविक्षेपेणप्रत्याहृतेंद्रियग्रामेणनिर्बाधेप्रदेशेऋजुकायेनजितद्वंद्वेनयोगि
नानासाग्रादौसंप्रज्ञातस्यसमाधेरभ्यासायचेतसःस्थिरीकरणंकर्त्तव्यमिति धारणामभिधायैतद्ध्यानमभिधातुमाह
तत्रप्रत्ययैकतानताध्यानं तत्रतस्मिन्देशेयत्रचित्तंधृतंतत्रप्रत्ययस्यज्ञानस्ययाएकतानताविसदृशपरिणामपरि
हारद्वारेणयदेवधारणायामालंबनीकृतंतदालंबनतयैवनिरंतरमुत्पत्तिःसाध्यानमुच्यते चरमंयोगांगंसमाधिमा
ह तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिः तदेवोक्तलक्षणंध्यानंयथार्थमात्रनिर्भासंअर्थाकारसमावेशा
दुद्भूतार्थरूपंअभ्युतंज्ञानस्वरूपत्वेनस्वरूपशून्यतामिवापद्यतेससमाधिरित्युच्यते सम्यगाधीयतेएकाग्रीक्रिय
तेविक्षेपान्परिहृत्ययत्रमनःससमाधिः उक्तलक्षणस्ययोगांगत्रयस्यव्यवहारायतांत्रिकींसंज्ञांकर्त्तुमाह त्रयमे
कत्रसंयमः एकस्मिन्विषयेध्यानधारणासमाधिलक्षणंत्रितयंप्रवर्त्तमानंसंयमसंज्ञयाशास्त्रेव्यवह्रियते शिव
तस्यफलमाह तज्जयात्प्रज्ञालोकः तस्यसंयमस्यजयादभ्यासेनसात्म्योत्पादनात्प्रज्ञायाज्ञातव्यविवेकरू २५
पायाआलोकःपरोभवतिप्रज्ञाज्ञेयंसम्यगवभासयतीत्यर्थः तस्योपयोगमाह तस्यभूमिषुविनियोगः तस्यसंय

मस्यभूमिषुस्थूलसूक्ष्मालंबनभेदेनस्थितासुचित्तवृत्तिषुविनियोगःकर्त्तव्यः अधरामधरांचित्तभूमिंजितांज्ञात्वोत्त
रस्यांभूमौसंयमःकार्यः नह्यसावात्मीकृताधारभूमिरुत्तरस्यांभूमौसंयमंकुर्वाणःफलभाग्भवति २ साधन
पादेयोगांगान्यष्टावुद्दिश्यपंचानांलक्षणंविधायत्रयाणांकथंनकृतमित्याशंक्याह त्रयमंतरंगंपूर्वेभ्यः पूर्वेभ्यो
यमादिभ्योयोगांगेभ्यःपारंपर्येणसमाधेरुपकारकेभ्योधारणादियोगांगत्रयंसंप्रज्ञातस्यसमाधेरंतरंगंसमाधि
स्वरूपनिष्पादनात्॥ तस्यापिसमाध्यंतरापेक्षयाबहिरंगत्वमाह तदपिबहिरंगंनिर्बीजस्य निर्बीजस्य
निरालंबनस्यशून्यभावनापरपर्यायस्यसमाधेरेतदपियोगांगत्रयंबहिरंगंपारंपर्येणोपकारकत्वात् इदानीं
योगांगसिद्धीराख्यातुकामःसंयमस्यविषयपरिशुद्धिंकर्तुंक्रमेणपरिणामत्रयमाह व्युत्थाननिरोधसंस्कारयोरभिभवप्रा
दुर्भावौनिरोधक्षणचित्तान्वयोनिरोधपरिणामः व्युत्थानंक्षिप्तमूढविक्षिप्ताख्यंभूमित्रयंनिरोधःप्रकृष्टसत्वस्यांगितया
चेतसःपरिणामस्ताभ्यांव्युत्थाननिरोधाभ्यांयौजनितौसंस्कारौतयोर्यथाक्रममभिभवप्रादुर्भावौयदाभवतःअभिभवो
न्यूनतयाकार्यस्यकारणेभ्योसामर्थ्येनावस्थानं प्रादुर्भावोवर्त्तमानेध्वनिअभिव्यक्तरूपतयावस्थानं तदानिरोधक्ष

णे चित्तस्योभयवृत्तित्वादन्वयो यः स निरोधपरिणाम इत्युच्यते अयमर्थः यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भ
वति निरोधसंस्काररूपश्चाविर्भवति धर्मिरूपतया च चित्तमुभयत्रान्वयित्वेनावस्थितं प्रतीयते तदा स निरोधपरिणामश
ब्दे न व्यवह्रियते चलत्वात् गुणवृत्तस्य यद्यपि चेतसो निश्चलत्वं नास्ति तथाप्येवंभूतपरिणामः स्थैर्यमुच्यते अस्यैव फल
माह तस्य प्रशान्तवाहिता संस्कारात् तस्य चेतस उक्तान्निरोधसंस्कारात् प्रशान्तवाहिता भवति परिहृतविक्षेपतया
सदृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः निरोधपरिणाममभिधाय समाधिपरिणाममाह सर्वार्थतैकाग्रतयोः क्ष
योदयौ चित्तस्य समाधिपरिणामः सर्वार्थता चलत्वान्नानाविधार्थग्रहणं चित्तस्य विक्षेपो धर्मः एकस्मिन्नेवालम्बने
सदृशपरिणामितैकाग्रत्वं तदपि चित्तस्य धर्मः तयोर्यथाक्रमं क्षयोदयौ सर्वार्थतालक्षणस्य धर्मस्य क्षयोऽत्य
न्तमभिभवः एकाग्रतालक्षणस्य धर्मस्य प्रादुर्भावोऽभिव्यक्तिश्चित्तस्योद्रिक्तसत्त्वस्यान्वयितयावस्थानं समाधिपरि शिव
णाम इत्युच्यते पूर्वस्मात्परिणामादस्यायं विशेषः तत्र संस्कारलक्षणयोर्धर्मयोरभिभवप्रादुर्भावौ पूर्वस्य व्युत्था २६
नसंस्कारस्य न्यग्भावः उत्तरस्य निरोधसंस्कारस्योद्भवोऽनभिभूतत्वेनावस्थानमिह तु क्षयोदयाविति सर्वार्थतारूप

स्य विक्षेपस्यात्यन्ततिरस्कारादनुत्पत्तिरतीतेऽध्वनि प्रवेशः क्षयः एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्तमानेऽध्वनि
प्रकटत्वं तृतीयमेकाग्रतापरिणाममाह शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः समाहितस्यैव चित्त
स्यैकः प्रत्ययो निर्विशेषः शान्तोऽतीतमध्वानं प्रविष्टः अपरस्तूदितो वर्तमानेऽध्वनि स्फुरितः द्वावपि समाहितचित्तत्वेन
तुल्यावेकरूपावलम्बनत्वेन सदृशौ प्रत्ययावुभयत्रापि समाहितस्यैव चित्तस्यान्वयित्वेनावस्थानं स एकाग्रतापरिणा
म इत्युच्यते चित्तपरिणामोक्तरूपमन्यत्रातिदिशन्नाह एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः
एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेषु स्थूलसूक्ष्मेषु इन्द्रियेषु बुद्धिकर्मलक्षणभेदेनावस्थितेषु धर्मलक्षणावस्थाभेदे
न त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरापत्तिः परिणामः यथा मृल्लक्षण
स्य धर्मिणः पिण्डरूपधर्मपरित्यागेन घटरूपधर्मान्तरस्वीकारो धर्मपरिणाम इत्युच्यते लक्षणपरिणामो यथा तस्यैव घट
स्यानागताध्वपरित्यागेन वर्तमानाध्वस्वीकारः तत्परित्यागेन वातीताध्वपरिग्रहः अवस्थापरिणामो यथा तस्यैव घटस्य
प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन यतश्च गुणवृत्तिर्नापरिणममाना क्षणमप्यस्ति ननु कोऽयं धर्मी इत्या

शंकय धर्मिणो लक्षणमाह शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी १४ शांता ये कृतस्वस्वव्यापारा अतीतेध्वन्यनुप्रविष्टा
उदिता ये अनागतमध्वानं परित्यज्य स्वव्यापारं कुर्वंति अव्यपदेश्या ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यंते तेषां यथा
स्वं सर्वात्मकमित्येवमादयो नियतकार्यकारणरूपयोग्यतयावच्छिन्ना शक्तिरेवेह धर्मशब्देनाभिधीयते तं त्रिविधमपि ध
र्मं यो अनुपतत्यनुवर्त्तते अन्वयित्वेन स्वीकरोति स शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी इत्युच्यते यथा सुवर्णं रुचकरूपध
र्मपरित्यागेन स्वस्तिकरूपधर्मांतरपरिग्रहे सुवर्णरूपतयानुवर्त्तमानं तेषु धर्मेषु कथंचिद्भिन्नेषु धर्मिरूपतया सामान्या
त्मना धर्मरूपतया विशेषात्मना स्थितमनुयायित्वेनावभासते एकस्य धर्मिणः कथमनेके परिणामा इत्याशंकामपनेतु
माह क्रमान्यत्वं परिणामान्यत्वे हेतुः धर्माणामुक्तलक्षणानां यः क्रमस्तस्य यत्प्रतिक्षणमन्यत्वं परिदृश्यमानं परिणा
मस्योक्तलक्षणस्यान्यत्वे नानाविधत्वे हेतुर्लिंगं ज्ञापकं भवति अयमर्थः यो यं नियतक्रमो मृच्चूर्णान्मृत्पिंडः ततः क शिव
पालानि तेभ्यश्च घट इत्येवंरूपः परिदृश्यमानः परिणामस्यान्यत्वमावेदयति तस्मिन्नेव धर्मिणि यो लक्षणपरिणाम २७
स्यावस्थापरिणामस्य च क्रमः सोप्यनेनैव न्यायेन परिणामान्यत्वे गमको वगंतव्यः सर्व एव भावा नियतेनैव क्रमेण प्रतिक्षण

परिणममाना दृश्यंते अतः सिद्धं क्रमान्यत्वात्परिणामान्यत्वं सर्वेषां चित्तादीनां परिणममानानां केचिद्धर्माः प्रत्यक्षेणै
वोपलभ्यंते यथा सुखादयः संस्थानादयश्च केचिच्चैकांतेनानुमानगम्याः यथा धर्मसंस्कारशक्तिप्रभृतयः धर्मि
णश्च भिन्नाभिन्नरूपतया सर्वत्रानुगमः इदानीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह प
रिणामत्रयसंयमादतीतानागतज्ञानं धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं तत्र संयमात्तस्मिन्विषये पूर्वो
क्तस्य संयमस्य करणादतीतानागतज्ञानं योगिनः समाधिर्भवति इदमत्र तात्पर्यं अस्मिन्धर्मिणि अयं धर्मः इदं लक्षणमि
यमवस्था वानागतादध्वनः समेत्य वर्तमानेध्वनि स्वं व्यापारं विधायातीतमध्वानं प्रविशतीत्येवं परिहृतविक्षेपतया यदा संय
मं करोति तदा यत्किंचिदतिक्रांतमनुत्पन्नं वा तत्सर्वं योगी जानाति यतश्चित्तस्य शुद्धसत्वप्रकाशरूपत्वात् सर्वार्थग्रह
णसामर्थ्यमविद्यादिभिर्विक्षेपैरजस्रं परिह्रियते यदा तु तैस्तैरुपायैर्विक्षेपाः परिह्रियंते तदा निवृत्तमलस्येवादर्शस्य
सर्वार्थग्रहणसामर्थ्यमेकाग्रताबलादाविर्भवति सिद्ध्यंतरमाह शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रवि
भागसंयमात्सर्वभूतरुतज्ञानं शब्दः श्रोत्रेंद्रियग्राह्यो नियतक्रमवर्णात्मा नियतैकार्थप्रतिपत्त्यवच्छिन्नः यदि वा क्र

मरहितःस्फोटात्माशास्त्रसंस्कृतबुद्धिग्राह्य उभयथापिपदरूपोवावाक्यरूपश्चतयोरेकार्थप्रतिपत्तौसामर्थ्यादर्थोजाति
गुणक्रियादिः प्रत्ययोज्ञानंविषयाकाराबुद्धिवृत्तिः एषांशब्दार्थज्ञानानांव्यवहारइतरेतराध्यासाद्भिन्नानामपिबु
द्ध्येकरूपतासंपादनात्संकीर्णत्वं तथाहि गामानयेत्युक्तेकश्चित् गोलक्षणमर्थंगोत्वजात्यवच्छिन्नंसास्नादिमत्पिंडरू
पंशब्दंचतद्वाचकंज्ञानंचतद्ग्राहकमभेदेनैवाध्यवस्यतिनत्वस्यगोशब्दोवाचकोयंगोशब्दस्यवाच्यस्तयोरिदंग्राहकं
ज्ञानमितिभेदेनव्यवहरति तथाहि कोयमर्थःकोयंशब्दःकिमिदंज्ञानमितिपृष्टःसर्वत्रैकरूपमेवोत्तरंददातिगौरिति
सयद्येकरूपतांनप्रतिपद्यतेकथमेकमुत्तरंप्रयच्छति एतस्मिन्स्थितेयोयंविभागः इदंशब्दस्यतत्वंयद्वाचकत्वंनामइदम
र्थस्ययद्वाच्यत्वं इदंज्ञानस्ययत्प्रकाशत्वंइतिप्रविभागंविधायतस्मिन्प्रविभागेयःसंयमंकरोतितस्यसर्वेषांभूतानांमृग
पशुपक्षिसरीसृपादीनांयद्रुतंयःशब्दस्तत्रज्ञानमुत्पद्यते अनेनाभिप्रायेणैतेनायंशब्दःसमुच्चरितइतिसर्वंजाना शिव
ति सिद्ध्यंतरमाह संस्कारसाक्षात्करणात्पूर्वजातिज्ञानं द्विविधाश्चित्तस्यवासनारूपाःसंस्काराः केचित्स्मृ २८
तिमात्रोत्पादनफलाः केचित्जात्यायुर्भोगलक्षणविपाकहेतवः यथाधर्माधर्माख्याः तेषुसंस्कारेषुयदासं

यमंकरोतिएवंमयासोर्थोनुभूतएवंमयासाक्रियानिष्पादितेतिपूर्ववृत्तंसर्वमनुसंदधानोभावनमेवावबोधकमंतरे
णोद्बुद्धसंस्कारःसर्वमतीतंस्मरति क्रमेणसाक्षात्कृतेषुबुद्धेषुसंस्कारेषुपूर्वजन्मानुभूतानपिजात्यादीन्प्रत्यक्षेण
पश्यति सिद्ध्यंतरमाह प्रत्ययस्यपरचित्तज्ञानं प्रत्ययस्यपरचित्तस्यकेनचित्मुखरागादिलिंगेनगृहीतस्ययदा
संयमंकरोतितदापरकीयस्यचित्तस्यज्ञानमुत्पद्यते सरागमस्यचित्तंविरागंवेतिपरचित्तगतानपिधर्मान्जानातीत्यर्थः
अस्यैवपरचित्तज्ञानस्यविशेषमाह नचतत्सालंबनंतस्याविषयीभूतत्वात् तस्यपरस्ययच्चित्तंतत्सालंबनंस्वकीया
लंबनेनसहितंनशक्यतेज्ञातुं आलंबनस्यकेनचित् लिंगेनाविषयीकृतत्वात् लिंगाच्चित्तमात्रंपरस्यावगतंनतुनीलवि
षयमस्यचित्तंपीतविषयमितिवा यच्चनगृहीतंतत्रसंयमस्यकर्तुमशक्यत्वात् नभवतिपरचित्तस्ययोविषयःतत्रज्ञा
नं तस्मात्परकीयचित्तंनालंबनसहितंगृह्यतेतस्यालंबनस्यागृहीतत्वात् चित्तधर्माःपुनर्गृह्यंतएव यदाकिमनेना
लंबितमितिप्रणिधानंकरोतितदातत्संयमात् तद्विषयमपिज्ञानमुत्पद्यतएव सिद्ध्यंतरमाह कायरूपसंयमात्
ग्राह्यशक्तिस्तंभेचक्षुःप्रकाशासंयोगेंतर्धानं कायःशरीरंतस्यरूपंचक्षुर्ग्राह्योगुणःतस्मिन्नस्त्यस्मिन्कायरूपमिति

संयमात्तस्यरूपस्यचक्षुर्ग्राह्यत्वरूपायाशक्तिः तस्याःस्तंभेभावनावशात् प्रतिबंधेचक्षुःप्रकाशासंयोगेचक्षुःप्रकाशः
सत्वधर्मस्तस्यासंयोगेतत् ग्रहणस्यव्यापाराभावेयोगिनोंतर्धानंभवति नकेनचिदसौदृश्यतइत्यर्थः एतेनशब्दा
द्यंतर्धानमुक्तं एतेनैवरूपाद्यंतर्धानोपायप्रदर्शनेनशब्दादीनांश्रोत्रादिग्राह्याणामंतर्धानमुक्तंवेदितव्यं सिद्ध्यंत
रमाह सोपक्रमंनिरूपक्रमंचकर्मतत्संयमादपरांतज्ञानमरिष्टेभ्योवा आयुर्विपाकंयत्पूर्वकृतंकर्मतत्द्विप्रका
रंसोपक्रमंनिरूपक्रमंच तत्रसोपक्रमंयत्फलजननायोपक्रमेणकार्यकारणाभिमुख्येनसहवर्ततेयथोष्णप्रदेशे
प्रसारितमार्द्रवस्त्रंशीघ्रमेवशुष्यति उक्तरूपविपरीतंनिरूपक्रमं यथातदेवार्द्रवासःसंवर्तितमनुष्णदेशेचिरे
णशोषमेति तस्मिन्द्विविधेकर्मणियःसंयमंकरोतिकिंकर्मशीघ्रविपाकंकिंचिरविपाकमितिएवंध्यानदार्ढ्यादप
रांतज्ञानमस्योत्पद्यते अपरांतःशरीरवियोगः तस्मिन् ज्ञानम् अमुष्मिन्कालेमुष्मिन्देशेममशरीरवियोगोभवि शिव
ष्यतीतिनिःसंशयंजानाति अरिष्टेभ्योवा अरिष्टानित्रिविधानि आध्यात्मिकाधिभौतिकाधिदैविकभेदेन २९
तत्राध्यात्मिकानिपिहितकर्णःकोष्ठस्यवायोर्घोषंनशृणोतिइत्येवमादीनि तेभ्यःशरीरवियोगकालंजाना

ति यद्यप्ययोगिनामप्यरिष्टेभ्यः प्रायेणज्ञानमुत्पद्यतेतथापितेषांसामान्याकारेणतत्संशयरूपं योगिनांपुनर्निय
तकालदेशतया प्रत्यक्षवदव्यभिचारि परिकर्मनिष्पन्नभूताःसिद्धीःप्रतिपादयितुमाह मैत्र्यादिषुबलानि मैत्री
करुणामुदितोपेक्षासुयोविहितःसंयमस्तस्यबलानिमैत्र्यादीनांसंबंधीनिप्रादुर्भवंति मैत्रीकरुणामुदितास्तथास्यप्र
कर्षंगच्छंतियथासर्वस्यमित्रत्वादिकंसंप्रतिपद्यते सिद्ध्यंतरमाह बलेषुहस्तिबलादीनि हस्त्यादिसंबंधिषुबलेषु
कृतसंयमस्यतद्बलानिहस्त्यादिबलानिआविर्भवंति तदयमर्थः यस्मिन्हस्तिबलेवावायुवेगेवासिंहवीर्येवातन्मयी
भावेनसंयमंकरोतितत्सर्वेसामर्थ्ययुक्तत्वात् सर्वमस्यप्रादुर्भवतीत्यर्थः सिद्ध्यंतरमाह प्रवृत्त्यालोकन्यासात्सूक्ष्म
व्यवहितविप्रकृष्टज्ञानं प्रवृत्तिर्विषयवतीज्योतिष्मतीचप्रागुक्तातस्यायोसावालोकः सात्विकप्रकाशप्रसरः तस्यनि
खिलेषुविषयेषुन्यासात्तद्वासितानांविषयाणांभावनात् सांतःकरणेषुइंद्रियेषुप्रकृष्टशक्तिमापन्नेषुसूक्ष्मस्यपर
माण्वादेःव्यवहितस्यभूम्यंतर्गतस्यनिधानादेर्विप्रकृष्टस्यमेरुपरपार्श्ववर्तिनोरसायनादेर्ज्ञानमुत्पद्यते एतत्समान
वृत्तांतं सिद्ध्यंतरमाह भुवनज्ञानंसूर्यसंयमात् सूर्येप्रकाशमयेयःसंयमंकरोतितस्यसप्तसुभूर्भुवःस्वःप्रभृतिषु

लोकेषु यानि भुवनानि तत्संनिवेशभांजि पुराणि तेषु यथावदस्य ज्ञानमुत्पद्यते पूर्वस्मिन्सूत्रे सात्विकः प्रकाश आलं
बनतयोक्तः इह तु भौतिक इति विशेषः भौतिकप्रकाशालंबनद्वारेणैव सिद्ध्यंतरमाह चंद्रे ताराव्यूहज्ञानं ताराणां
णां ज्योतिषां यो व्यूहः विशिष्टः संनिवेशः तस्मिन् चंद्रे कृतसंयमस्य ज्ञानमुत्पद्यते सूर्यप्रकाशेन हृततेजस्कत्वात्ता
राणां सूर्यसंयमात् तत् ज्ञानं न शक्नोति भवितुमिति पृथगयमुपायोभिहितः सिद्ध्यंतरमाह ध्रुवे तद्गतिज्ञानं ध्रुवे
निश्चले ज्योतिषां प्रधाने कृतसंयमस्य तासां ताराणां या गतिः प्रत्येकं नियतकाला नियतदेशा च तस्याः ज्ञानमुत्पद्यते इयं
ताराऽयं ग्रह इयता कालेनामुं राशिमिदं नक्षत्रं यास्यतीति सर्वं जानातीति सूत्रार्थः इदं कालज्ञानमस्य फलमित्युक्तं
भवति बाह्याः सिद्धीः प्रतिपाद्य आंतराः प्रतिपादयितुमुपक्रमते नाभिचक्रे कायव्यूहज्ञानं शरीरवर्त्ति नाभिसं
ज्ञकं यत् षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः कायगतो योसौ व्यूहो विशिष्टरसमलधातुनाड्यादीनामवस्थानं
तत्र ज्ञानमुत्पद्यते इदमुक्तं भवति नाभिचक्रं शरीरमध्यवर्त्ति सर्वतः प्रसृतानां नाड्यादीनां मूलभूतमतस्तत्र कृतावधा ३०
नस्य समग्रः संनिवेशो यथावदाभाति सिद्ध्यंतरमाह कंठकूपे क्षुत्पिपासानिवृत्तिः कंठे गले कूपः कंठकूपः

जिह्वायामूले जिह्वातंतोरधस्तात् कूप इव कूपो गर्त्ताकारः प्रदेशः प्राणादेर्यत्संस्पर्शात् क्षुत्पिपासादयः प्रादुर्भवंति त
स्मिन् कृतसंयमस्य योगिनः क्षुत्पिपासादयो निवर्त्तंते घंटिकाधस्तात् स्रोतसा धार्यमाणे तस्मिन् भाविते भवत्येवंविधा सि
द्धिः सिद्ध्यंतरमाह कूर्मनाड्यां स्थैर्यं कंठकूपादधस्तात् या कूर्माख्या नाडी तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्प
द्यते तत्स्थानमनुप्रविष्टस्य चंचलता न भवतीत्यर्थः यदि वा कायस्य स्थैर्यमुत्पद्यते न केनचित् स्पंदयितुं शक्यत इत्यर्थः सि
द्ध्यंतरमाह मूर्द्धज्योतिषि सिद्धदर्शनं शिरःकपाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधारत्वात् ज्योतिः यथा गृहाभ्यंतरस्थ
स्य मणेः प्रसरंती प्रभा कुंचिकाविवरप्रदेशे संघट्टते तथा हृदयस्थः सात्विकः प्रकाशः प्रसृतस्तत्र संपिंडितत्वं भजते तत्र
कृतसंयमस्य ये द्यावापृथिव्योरंतरालवर्त्तिनः सिद्धाः दिव्याः पुरुषाः तेषामितरप्राणिभिरदृश्यानां तस्य दर्शनं भवति
तान् स पश्यति तैश्च संभाष्यत इत्यर्थः सर्वज्ञत्वे उपायांतरमाह प्रातिभाद्वा सर्वं सर्वनिमित्तानपेक्षं मनोमात्रज
न्यमविसंवादकं द्रागित्युत्पद्यमानं ज्ञानं प्रतिभा तस्यां संयमे क्रियमाणे प्रातिभं विवेकख्यातेः पूर्वभावि तारकं ज्ञानमु
देति यथोदेष्यति सवितरि प्रभा प्रादुर्भवति तद्वद्विवेकख्यातेः पूर्वं तारकं सर्वविषयं ज्ञानमाविर्भवति तस्मिन् सति

संयमांतरानपेक्षः सर्वंजानातीत्यर्थः सिद्ध्यंतरमाह हृदयेचित्तसंवित् हृदयंशरीरस्यप्रदेशविशेषः तस्मिन्नधोमु
खस्वल्पपुंडरीकाभ्यंतरेअंतःकरणस्यस्थानंतत्रकृतसंयमस्यस्वपरचित्तज्ञानमुत्पद्यते स्वचित्तगताः सर्वावासनाः
परचित्तगतांश्चरागादीन् जानातीत्यर्थः सिद्ध्यंतरमाह सत्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषात् भोगः परार्था
न्यस्वार्थसंयमात्पुरुषज्ञानं सत्वंप्रकाशसुखात्मकंप्राधानिकःपरिणामविशेषः पुरुषोभोक्ताधिष्ठातृरूपः तयोर्भो
ग्यभोक्तृत्वरूपत्वात् चेतनाचेतनत्वाच्चात्यंतासंकीर्णत्वंभिन्नत्वमित्यर्थः तयोर्यःप्रत्ययस्याविशेषोभेदेनाप्रतिभास
नंतस्मात्सत्वस्यैवकर्तृतापत्यायासुखदुःखसंवित्साभोगः सत्वस्यस्वार्थनैरपेक्ष्येणपरार्थःपुरुषार्थनिमित्तःतस्मादन्यो
यःस्वार्थःपुरुषस्वरूपमात्रालंबनःपरित्यक्ताहंकारसत्वेयाचिच्छायासंक्रांतिः तत्रकृतसंयमस्यपुरुषविषयंज्ञानमुत्पद्य
तेतदेवंरूपंस्वालंबनंज्ञानंसत्वनिष्ठःपुरुषोजानातिनपुनःपुरुषोज्ञाताज्ञानस्यविषयभावमापद्यतेज्ञेयत्वापत्तेःज्ञातृ शिव
ज्ञेययोश्चात्यंतविरोधात् अस्यैवसंयमस्यफलमाह ततःप्रातिभश्रवणवेदनादर्शास्वादवार्ताजायंते ततःपुरुषसं ३१
यमादभ्यस्यमानात् व्युत्थितस्यापिज्ञानानिजायंते तत्रप्रातिभंपूर्वोक्तंज्ञानंतस्याविर्भावात्सूक्ष्मादिकमर्थंपश्यति

श्रावणंश्रोत्रेंद्रियजंज्ञानंतस्मात्प्रकृष्टाद्दिव्यंदिविभवंशब्दं जानाति वेदनास्पर्शेंद्रियजंज्ञानंवेद्यतेनयेतिकृत्वातांत्रिक्या
संज्ञयाव्यवह्रियतेतस्माद्दिव्यस्पर्शविषयंज्ञानमुपजायते आदर्शश्चक्षुरिंद्रियजंज्ञानं आसमंतात् दृश्यतेरूपमने
नेतिकृत्वातस्यप्रकर्षाद्दिव्यंरूपज्ञानमुत्पद्यते आस्वादोरसनेंद्रियजंज्ञानंआस्वाद्यतेनेनेतिकृत्वातस्मिन्प्रकृष्टेदि
व्येरसेसंविदुपजायते वार्त्तागंधसंवित्तिःवर्त्तिशब्देनतांत्रिक्यापरिभाषयाघ्राणेंद्रियमुच्यतेवर्त्ततेगंधविषयइति
कृत्वावर्त्तेःघ्राणेंद्रियाज्जातावार्त्तागंधसंवित्तिः तस्यांप्रकृष्यमाणायांदिव्योगंधोनुभूयते एषांफलविशेषाणां
विषयभागमाह तेसमाधावुपसर्गाव्युत्थानेसिद्धयः तेप्राक्प्रतिपादिताःफलविशेषाःसमाधेःप्रकर्षंगच्छतः
उपसर्गाउपद्रवाविघ्नकारिणः तत्रहर्षविस्मयादिकारणेनसमाधिःशिथिलीभवतिव्युत्थानेतुव्यवहारदशायां
विशिष्टफलदायकत्वात्सिद्धयोभवंति सिद्ध्यंतरमाह बंधकारणशैथिल्यात्प्रचारसंवेदनाच्चचित्तस्यपरश
रीरावेशः व्यापकत्वादात्मचित्तयोर्नियतकर्मवशादेवशरीरांतर्गतयोरेवभोक्तृभोग्यभावेनयत् संवेदनमुपजायते
सएवशरीरेबंधइत्युच्यते तद्यदासमाधिवशाद्बंधकारणंधर्माधर्माख्यंशिथिलंभवतितानवमापद्यते चित्तस्ययोसौ

प्रचारोहृदयदेशादिंद्रियद्वारेणविषयाभिमुख्येनप्रसरः तस्यसंवेदनंज्ञानंइयंचित्तवहानाडी।अनयाचित्तंवहतिइयंच
प्राणादिवहाभ्योनाडीभ्योविलक्षणाइतिस्वपरशरीरयोर्यदासंचारंजानातितदापरकीयंशरीरंमृतंजीवच्छरीरंवाचित्तसंचा
रद्वारेणप्रविशतिचित्तंपरशरीरेप्रविशत्इंद्रियाण्यनुवर्त्तंते मधुकरराजमिवमधुमक्षिकाः ततःपरशरीरप्रविष्टोयोगी
स्वशरीरवत्तेनव्यवहरति यतोव्यापकयोश्चित्तपुरुषयोर्भोगसंकोचेकारणंकर्माभूत् तच्चेत्समाधिनाक्षिप्तंतदास्वातंत्र्या
त्सर्वत्रैवभोगनिष्पत्तिः सिद्ध्यंतरमाह उदानजयाज्जलपंककंटकादिष्वसंगउत्क्रांतिश्च समस्तानामिंद्रियाणा
मुखाज्वालावद्यायुगपदुत्थितावृत्तिःसाजीवनशब्दवाच्या तस्याःक्रियाभेदात्प्राणादिभिःसंज्ञाभिर्व्यपदेशः तत्रहृदया
न्मुखनासिकाद्वारेणवायोःप्रणयनात्प्राणइत्युच्यते नाभिप्रदेशात्पादांगुष्ठपर्यंतंअपनयनादपानः नाभिप्रदेशंपरि
वेष्ट्यसमंतान्नयनात्समानः कृकाटिकादेशादाशिरोवृत्तेरुन्नयनादुदानः व्याप्यनयनात्सर्वशरीरव्यापीव्या
नः उदानस्यसंयमद्वारेणजयादितरेषांवायूनांनिरोधादूर्ध्वगामित्वेनजलेमहानद्यादौमहतिवाकर्दमेतीक्ष्णेषुकंट शिव
केषुवानसज्जतेअतिलघुत्वात् तूलपिंडवज्जलादौमज्जितोप्युद्गच्छतीत्यर्थः सिद्ध्यंतरमाह समानजयाज्ज्व ३२

लनं अग्निमावेष्ट्यव्यवस्थितस्यसमानाख्यस्यवायोर्जयात्संयमेनवशीकारात् निरावरणस्याग्नेरुद्भूततेजसाप्रज्वल
न्निवयोगीप्रतिभाति सिद्ध्यंतरमाह श्रोत्राकाशयोःसंबंधसंयमाद्दिव्यंश्रोत्रं श्रोत्रंशब्दग्राहकमाहंकारिकमिंद्रियंआ
काशंव्योमशब्दतन्मात्रकार्यं तयोःसंबंधोदेशदेशिभावलक्षणः तस्मिन्कृतसंयमस्ययोगिनोदिव्यंश्रोत्रंप्रवर्त्तते यु
गपत्सूक्ष्मव्यवहितविप्रकृष्टग्रहणसमर्थंभवतीत्यर्थः सिद्ध्यंतरमाह कायाकाशयोःसंबंधसमाल्लघुतूलसमा
पत्तेश्चाकाशगमनं कायःपांचभौतिकंशरीरंतस्याकाशेनावकाशदानाद्यःसंबंधस्तत्रसंयमंविधायलघुनितूलादौस
मापत्तिंस्तन्मयीभावलक्षणांवाविधायप्राप्तात्यंतलघुभावोयोगीप्रथमंयथारुचिसंचरन्क्रमेणोर्णनाभतंतुजा
लेनसंचरमाणः आदित्यरश्मिभिश्चविहरन्यथेष्टमाकाशेनगच्छति सिद्ध्यंतरमाह बहिरकल्पितावृत्तिर्महाविदे
हाततःप्रकाशावरणक्षयः शरीराद्बहिर्यामनसःशरीरनैरपेक्ष्येणवृत्तिःसामहाविदेहानामविगतशरीराहंकारदार्ढ्य
द्वारेणोच्यते ततस्तस्यांकृतसमात्प्रकाशावरणक्षयः सात्विकस्यचित्तस्ययःप्रकाशःतस्ययदावरणंक्लेशकर्मादि
तस्यक्षयःप्रविलयोभवति अयमर्थः शरीराहंकारेसतियामनसोबहिर्वृत्तिःसाकल्पितेत्युच्यतेयदापुनःशरीराहं

कारभावंपरित्यज्यस्वातंत्र्येणमनसोवृत्तिःसाअकल्पितातस्यांसंयमात्योगिनःसर्वेचित्तमलाःक्षीयंते तदेवपूर्वोक्त
विषयाःपरांतविषयामध्यभावाश्वसिद्धीः प्रतिपाद्यानंतरंभुवनज्ञानादिरूपाबाह्याःकायव्यूहादिरूपाआभ्यंतराः
परिकर्मनिष्पंदरूपामैत्र्यादिषुबलानीत्येवमाद्याःसमाध्युपयोगिनीश्चअंतःकरणबहिःकरणलक्षणेंद्रियभवाःप्रा
णादिवायुभवाश्वसिद्धीश्चितदार्ढ्यात्समाधौसमाश्वासोत्पत्तयेप्रतिपाद्येदानींस्वदर्शनोपयोगिसबीजनिर्बीज
प्र समाधिसिद्धयेविविधोपायंदर्शनायाह स्थूलस्वरूपसूक्ष्मान्वयार्थवत्वसंयमाद्भूतजयः पंचानांपृथिव्यादीनां
भूतानांयेपंचावस्थाविशेषरूपाधर्माःस्थूलत्वादयःतत्रकृतसंयमस्यभूतजयोभवतिभूतानिवश्यान्यस्यभवंतीत्य
र्थः तथाहि भूतानांपरिदृश्यमानंविशिष्टाकारवत्रूपंस्थूलंस्वरूपंचैषांयथाक्रमंकार्यंगंधस्नेहोष्णताप्रेरणावकाश
· दानलक्षणंसूक्ष्मंचयथाक्रमंभूतानांकारणत्वेनव्यवस्थितानितन्मात्राणि अन्वयिनोगुणाःप्रकाशप्रवृत्तिस्थितिरू शिव
पतयासर्वत्रैवा न्वयित्वेनसमुपलभ्यंते अन्वयित्वंतेष्वेवगुणेषुभोगापवर्गसंपादनाख्याशक्तिः तदेवंभूतेषुपंचस्तूक्त ३२
क्तलक्षणावच्छिन्नेषुप्रत्यवस्थंसंयमंकुर्वन्योगीभूतमयोभवति तद्यथा प्रथमंस्थूलेरूपेसंयमंविधायतदनुस्वरू

पइत्येवंक्रमेणतस्यकृतसंयमस्यसंकल्पानुविधायिन्योवत्सानुसारिण्यइवगावोभूतप्रकृतयोभवंति तस्यैवभूतज प्र
यस्यफलमाह ततोणिमादिप्रादुर्भावःकायसंपत्तद्धर्मानभिघातश्च अणिमापरमाणुरूपतापत्तिःमहिमामहत्वं
लघिमातूलपिंडवल्लघुत्वप्राप्तिःगरिमागुरुत्वप्राप्तिः अंगुल्यग्रेणचंद्रादिस्पर्शनशक्तिःप्राकाम्यमिच्छानभिघातः
शरीरांतःकरणेश्वरत्वमीशित्वंसर्वतःप्रभविष्णुत्वंवशित्वं सर्वाण्येवभूतान्यनुगामित्वात्तदुक्तंनातिक्रमंति तत्रकामा
वसायः यस्मिन्विषयेस्यकामइच्छाभवतितस्मिन्विषयेयोगिनोव्यवसायोभवति तद्विषयंस्वीकारद्वारेणाभिलाष
समाप्तिपर्यंतंनयतीत्यर्थः तएतेअणिमाद्याःसमाध्युपयोगिभूतजयात्योगिनःप्रादुर्भवंति यथापरमाणुत्वप्राप्तेः
वज्रादिकानप्यंतःप्रविशति एवंसर्वत्रयोज्यं तएतेअणिमादयोष्टौगुणामहासिद्धयइत्युच्यंते कायसंपद्वक्ष्य
माणातांप्राप्नोति तद्धर्मानभिघातश्च तस्यकायस्ययेधर्मारूपादयःतेषामनभिघातोनाशोनास्ति नास्यरूपमग्नि
र्दहतिनचवायुःशोषयतीत्यादियोज्यं कायसंपदमाह रूपलावण्यबलवज्रसंहननानिकायसंपत् रूपलावण्य
बलानिप्रसिद्धानि वज्रसंहननंवज्रवत्कठिनासंहतिरस्यशरीरेभवतीत्यर्थः इतिकायस्याविर्भूतगुणसंपत्

एवं भूतजयमभिधाय प्राप्तभूमिकस्येन्द्रियजयमाह ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ग्रहणमिं
द्रियाणां विषयाभिमुखीवृत्तिः स्वरूपं सामान्येन प्रकाशत्वं अस्मिता अहंकारानुगमः अन्वयार्थवत्त्वे पूर्ववत्
एतेषामिन्द्रियाणामवस्थापंचके पूर्ववत्संयमं कृत्वेन्द्रियजयी भवति तस्य फलमाह ततो मनोजवित्वं विकरणभावः
प्रधानजयश्च शरीरस्य मनोवदनुत्तमो गतिलाभो मनोजवित्वं कायनिरपेक्षाणामिन्द्रियाणां वृत्तिलाभो विकरण
भावः सर्ववशित्वं प्रधानजयः एताः सिद्धयो जितेन्द्रियस्य प्रादुर्भवंति ताश्चास्मिन् शास्त्रे मधुप्रतीका इत्युच्यंते
यथा मधुन एकदेशोपि स्वदते एवं प्रत्येकमेताः सिद्धयः स्वदंत इति मधुप्रतीकाः इन्द्रियजयमभिधायांतःकरणजयमा
ह सत्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च तस्मिन् शुद्धे सात्विकपरिणामे कृतसंय
मस्य यासत्वपुरुषयोरुत्पद्यते विवेकख्यातिः गुणानां कर्तृत्वाभिमानशिथिलीभावरूपा तन्माहात्म्यात्तत्रैव स्थि
तस्य योगिनः सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्भवति सर्वेषां गुणपरिणामानां भावानां स्वामिवदाक्रमणं
सर्वभावाधिष्ठातृत्वं तेषामेव शान्तोदिताव्यपदेश्यधर्मित्वेनावस्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं एषा शिव ३४

चास्मिन् शास्त्रे परस्यां वशीकारसंज्ञायां प्राप्तायां विशोका नाम सिद्धिरुच्यते क्रमेण भूमिकांतरमाह तद्वैराग्यादपि दोष
बीजक्षये कैवल्यं एतस्यामपि विशोकायां सिद्धौ यदा वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां रागादीनां यद्बीजमवि
द्यादयस्तस्य क्षये निर्मूलत्वे कैवल्यमात्यंतिकी दुःखनिवृत्तिः पुरुषस्य गुणानामधिकारपरिसमाप्तौ स्वरूपप्रतिष्ठत्वं
अस्मिन्नेव समाधौ स्थित्युपायमाह स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगात् चत्वारो योगिनो भवंति तत्रा
भ्यासवान् प्रवृत्तमात्रज्योतिः प्रथमः ऋतंभरप्रज्ञो द्वितीयः भूतेन्द्रियजयी तृतीयः अतिक्रांतभावनीयश्चतुर्थः तत्र च
तुर्थस्य समाधेः प्राप्तसप्तविधभूमिप्रज्ञस्यान्त्यां मधुमतीसंज्ञां भूमिकां साक्षात् कुर्वतः स्थानिनो देवा उपनिमंत्रयितारो
भवंति दिव्यस्त्रीरसायनादिकं ढौकयंतीति तस्मिन्नुपनिमंत्रणेनानेन संगः कर्तव्यो नापि स्मयः संगकरणे विषयभो
गे पतति स्मयकरणे कृतकृत्यमात्मानं मन्यमानो न समाधावुत्सहते अतः संगस्मययोस्तेन वर्जनं कर्तव्यं अस्यामेव फल
भूतायां विवेकख्यातौ पूर्वोक्तसंयमव्यतिरिक्तमुपायांतरमाह क्षणक्रमयोः संयमाद्विवेकज्ञानं क्षणः सर्वांत्यः काला
वयवः यस्य कला प्रविभक्तुं न शक्यते तथाविधानां कालक्षणानां यः क्रमः पौर्वापर्येण परिणामः तत्र संयमात्प्रागुक्तवि

वेकजं ज्ञानमुत्पद्यते अयमर्थः अयं कालक्षणोऽमुष्मात्कालक्षणादुत्तरोऽयमस्मात्पूर्व इत्येवं विधे क्रमे कृतसंयमस्यात्यन्त
तः सूक्ष्मेपि क्षणक्रमे यदा भवति साक्षात्कारस्तदान्यदपि सूक्ष्मं महदादि साक्षात्करोतीति विवेकज्ञानोत्पत्तिः अस्यैव संय
मस्य विषयविवेकोपयोगमाह जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः पदार्थानां भेदहेतवो जाति
लक्षणदेशा भवंति क्वचित् भेदहेतुर्जातिः यथा गौरियं महिषीयमिति जात्या तुल्ययोर्लक्षणं भेदहेतुः इयं कर्बुरा इय
मरुणेति जात्या लक्षणेन चाभिन्नयोर्भेदहेतुर्देशो द्रष्टव्यः यथा तुल्यपरिणामयोरामलकयोर्भिन्नदेशावस्थितयोः
यत्र पुनर्भेदोवधारयितुं न शक्यते यथैकदेशस्थितयोः शुक्लयोः पार्थिवयोः परमाण्वोः तथाविधे विषये भेदाय कृतसं
यमस्य यदा भेदेन ज्ञानमुपजायते तदभ्यासात्सूक्ष्माण्यपि तत्त्वानि भेदेन प्रतिपद्यते एतदुक्तं भवति यत्रकेनचिदुपाये
न भेदोनावधारयितुं शक्यः तत्र संयमाद्भवत्येव भेदप्रतिपत्तिः सूक्ष्माणां तत्त्वानां मुक्तस्य विवेकजन्यज्ञानस्य संज्ञावि शिव
षयस्वाभाव्यं व्याख्यातुमाह तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानं उक्तसंयमबलादत्या ३५
यां भूमिकायामुत्पन्नं ज्ञानं तारयत्यगाधात्संसारसागरात् योगिनमित्यन्वर्थिक्यास्संज्ञया तारकमित्युच्यते अस्य वि

षयमाह सर्वविषयमिति सर्वाणि तत्त्वानि महदादीनि विषयो यस्येति सर्वविषयं सर्वाभिरवस्थाभिः स्थूलसूक्ष्मादिभेदेन
तैस्तैः परिणामैः सर्वेण प्रकारेणावस्थितानि तत्त्वानि विषयो यस्येति सर्वथाविषयं स्वभावांतरमाह अक्रमं चेति निःशेष
नानावस्थापरिणतत्र्यात्मकभावग्रहणे नास्य क्रमो विद्यत इत्यक्रमं सर्वं करतलामलकवद्युगपत्पश्यतीत्यर्थः अस्मा
च्च विवेकजात्तारकात् किं भवतीत्याह सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं सत्त्वपुरुषावुक्तलक्षणौ तयोः शुद्धिसाम्ये कै
वल्यं विनसत्त्वस्य कर्तृत्वाभिमाननिवृत्त्या स्वकारणे अनुप्रवेशः शुद्धिः पुरुषस्य शुद्धिरुपचरितभोगाभाव इति द्वयोः
समानायां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते मोक्षो भवतीत्यर्थः तदेवमंतरंगं योगांगत्रयमभिधाय तस्य च संयमसंज्ञां कृ
त्वा संयमस्य च विषयप्रदर्शनार्थं परिणामत्रयमुपपाद्य संयमबलोत्पद्यमानाः पूर्वांतापरांतमध्यभवाः सिद्धीरुपद
र्श्य समाध्याश्वासोत्पत्तये बाह्या भुवनज्ञानादिरूपा आभ्यंतराश्च कायव्यूहनादिरूपाः प्रदर्श्य समाध्युपयोगाय इंद्रि
यप्राणजयादिपूर्विकाः परमपुरुषार्थसिद्धये यथाक्रममवस्थासहितभूतजयेंद्रियजयसत्त्वजयोद्भवा व्याख्याय वि
वेकज्ञानोत्पत्तये तासामुपायानुपन्यस्य तारकस्य सर्वसमाध्यवस्थापर्यंतभवस्य स्वरूपमभिधाय तत्समापत्तेः कृताधि

कारस्य चित्तसत्वस्य कारणेनुप्रवेशात् कैवल्यमुत्पद्यत इत्यभिहितमिति निर्णीतो विभूतिपादस्तृतीयः इति महाराजाधि
राजभोजदेवविरचितायां राजमार्त्तंडाभिधानायां पातंजलयोगशास्त्रवृत्तौ विभूतिपादस्तृतीयः यदाज्ञयैव कैवल्यं वि
नोपायैः प्रजायते तमेकमजमीशानं चिदानंदमयं स्तुमः १ इदानीं विप्रतिपत्तिसमुत्थभ्रांतिनिराकरणेन युक्त्या कैवल्य
स्वरूपज्ञापनाय कैवल्यपादोयमारभ्यते तत्र पूर्वमुक्ताः सिद्धयस्तासां नानाविधजन्मादिकारणप्रतिपादनद्वारेणैवं बो
धयति यदि एताः याः सिद्धयस्ताः पूर्वजन्माभ्यस्तसमाधिबलाज्जन्मादिनिमित्तमात्रत्वेनाश्रित्य प्रवर्त्तंते तेन तत्रानेक
भवसाध्यस्य समाधेर्नक्षतिरस्तीत्याश्वासोत्पादनाय समाधिसिद्धेश्च प्राधान्यख्यापनार्थं कैवल्यप्रयोगार्थं चाह
जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः काश्चन जन्मनिमित्ता एव सिद्धयः यथा पक्ष्यादीनामाकाशगमनाद
यः यथा वा कपिलमहर्षिप्रभृतीनां जन्मसमनंतरमेवोपजायमाना ज्ञानादयः सांसिद्धिका गुणाः औषधिसिद्धयो य
थापारदादिरसायनाद्युपयोगात् मंत्रसिद्धिर्यथा केषांचिदाकाशगमनादि तपःसिद्धिर्यथा विश्वामित्रादीनां
समाधिसिद्धिर्यथा प्राक् प्रतिपादिता एताः सिद्धयः पूर्वजन्मनि क्षपितक्लेशाणामेवोपजायंते तस्मात्समाधिसिद्धा

शिव
३६

चिवान्यासां सिद्धीनां समाधिरेव जन्मांतराभ्यस्तः कारणं मंत्रादीनि निमित्तमात्राणि ननु नंदीश्वरादीनां जात्यादिपरिणामोस्मि
न्नेव दृश्यते तत्कथं जन्मांतराभ्यस्तस्य समाधेः कारणत्वमुच्यत इत्याशंक्याह जात्यंतरपरिणामः प्रकृत्यापूरात् योय
मिहैव जन्मनि नंदीश्वरादीनां जात्यादिपरिणामः स प्रकृत्यापूरात् पाश्चात्या एव हि प्रकृतयः अमुष्मिन् जन्मनि विकारा
नापूरयंति जात्यंतराकारेण परिणमयंति ननु च धर्मादयस्तत्र क्रियमाणा उपलभ्यंते तत्कथं प्रकृतीनामापूरणे कारणत्वमि ण
त्याह निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् निमित्तं धर्मादि तत्प्रकृतीनां अर्थांतरपरिणामेन प्रयो
जकं न हि कार्येण कारणं प्रवर्त्तते कुत्र तर्हि तस्य धर्मादेर्व्यापार इत्याह वरणभेदस्तु ततः क्षेत्रिकवत् ततस्तस्मादनुष्ठी
यमानाद्वरणमावरकं धर्मादि तस्यैव विरोधित्वाद्भेदः क्षयः क्रियते तस्मिन् प्रतिबंधके क्षीणे प्रकृतयः स्वयमभिमतका
र्याय प्रभवंति दृष्टांतमाह क्षेत्रिकवत् यदा क्षेत्रिकः कृषीवलः केदारात् केदारांतरं जलं निनीषुर्जलप्रतिबंधकवर
णभेदमात्रं करोति तस्मिन् भिन्ने जलं स्वयमेव प्रसररूपं परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चित् व्यापारः
एवं धर्मादेर्बोद्धव्यं यदा साक्षात्कृततत्वस्य योगिनो युगपत् कर्मभोगाय आत्मीयनिरतिशयविभूत्यनुभावाद्युगप

दनेकशरीरनिर्मिमित्तोपजायतेतदाकुतस्यानिचित्तानिप्रभवंतीत्याह निर्माणचित्तान्यस्मितामात्रात् योगिनः
स्वयंनिर्मितेषुकायेषुयानिचित्तानितानिमूलकारणत् अस्मितात्रादेवतदिच्छयाप्रसरंति अग्नेर्विस्फुलिंगाइवयु
गपत्परिणमंति ननुबहूनांचित्तानांभिन्नाभिप्रायत्वान्नैककार्यकर्तृत्वंस्यादित्यतआह प्रवृत्तिभेदेप्रयोजकं
चित्तमेकमनेकेषां चेतसांप्रवृत्तिभेदे व्यापारनानात्वेएकंयोगिनश्चित्तंप्रयोजकंप्रेरकंअधिष्ठातृत्वेन तेननभि
न्नमतत्वं अयमर्थः यथात्मीयेशरीरेमनश्चक्षुःपाण्यादीनियथेष्टंप्रेरयतिअधिष्ठातृत्वेनतथाकायांतरेष्वपीति
जन्मादिप्रभवत्वात्सिद्धीनांचित्तमपितत्प्रभवंपंचविधमेवततोजन्मादिप्रभवात्चित्तात्समाधिप्रभवस्यवैलक्ष
ण्यमाह तत्रध्यानजमनाशयं ध्यानजंसमाधिजंयच्चित्तंतत्पंचसुमध्येअनाशयंकर्मवासनारहितमित्यर्थः
यथेतरचित्तेभ्योयोगिनश्चित्तंक्लेशादिरहितंविलक्षणंतथाकर्मापिविलक्षणमित्याह कर्मशुक्लकृष्णमुभ शिव
दि येयोगिनस्त्रिविधमितरेषां शुभफलदंकर्मयागादिशुक्लं अशुभफलदंब्रह्महत्यादिकृष्णं उभयसंकीर्णं ३७
शुक्लकृष्णं तत्रशुक्लंकर्मविचक्षणानांदानतपःस्वाध्यायादिमतांपुरुषाणां कृष्णंकर्मनारकिणां शुक्लकृ

ष्णंमनुष्याणां योगिनांतुसंन्यासवतामेवंविधंकर्मक्रियमाणंतत्फलत्यागानुसंधानेनैवानुष्ठानान्नकिंचित्फलमारभ
ते अस्यैवकर्मणःफलमाह ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां त्रिविधाःकर्मवासनाःस्मृतिमा
त्रफलाःजात्यायुर्भोगफलाश्च तत्रजात्यायुर्भोगफलाएकानेकजन्मभवाइत्यनेनपूर्वमेवकृतनिर्णयाः याःस्मृतिमा
त्रफलास्तासुततःकर्मणोयादृक्शरीरमारब्धंदेवमनुष्यतिर्यगादिभेदेनतस्यविपाकस्ययाअनुगुणाअनुरूपावा
सनास्तासामेवतस्मादभिव्यक्तिर्वासनानांभवति अयमर्थः येनकर्मणापूर्वंदेवतादिशरीरमारब्धंजात्यंतरशतव्यव
धानेनपुनस्तथाविधस्यैवशरीरस्यारंभेतदनुरूपाएवस्मृतिफलावासनाःप्रकटीभवंति लोकांतरेष्वेवार्थेषुतस्य
स्मृत्यादयोजायंतेइतरास्तुसत्योप्यव्यक्तसंज्ञास्तिष्ठंति नतस्यांदशायांनारकादिशरीरस्योपभोगभवावासनाव्यक्ति
मायांति आसांवासनानांकार्यकारणानुपपत्तिमाशंक्यसमर्थयितुमाह जातिदेशकालव्यवहितानामप्यानंतर्यंस्मृ
तिसंस्कारयोरेकरूपत्वात् इहनानायोनिषुभ्रमतांसंसारिणांकांचिद्योनिमनुभूययदायोन्यंतरसहस्रव्यवधा
नेनपुनस्तामेवयोनिंप्रतिपद्यतेतदातस्यांपूर्वानुभूतायांयोनौतथाविधशरीरादिव्यंजकापेक्षयावासनाःयाःप्र

कटीभूता आसन् तास्तथाविधव्यंजकाभावात् तिरोभूताः पुनस्तथाविधव्यंजकः शरीरादिलाभे प्रकटीभवंति ज
तिदेशकालव्यवधानेपि तासां स्वानुरूपो दि स्मृत्यो फलसाधने आनंतर्यं नैरंतर्यमेव कुतः स्मृतिसंस्कारयोरेकरू
पत्वात् तथाहि अनुष्ठीयमानात् कर्मणश्चित्तसत्वे वासनारूपः संस्कारः समुत्पद्यते स च स्वर्गनरकादीनां फलानां
मंकुरीभावः कर्मणां यागादीनां शक्तिरूपतयावस्थानं कर्तुर्वा तथाविधभोगभोक्तृत्वरूपं सामर्थ्यं संस्कारात् स्मृतिः
स्मृतेश्च सुखदुःखोपभोगः तदनुभवाच्च पुनरपि संस्कारस्मृत्यादयः एवं च सति यस्य स्मृतिसंस्कारादयो भिन्नाः त
स्यानंतर्याभावे दुर्लभः कार्यकारणभावः अस्माकं तु यदा अनुभव एव संस्कारी भवति संस्कारश्च स्मृतिरूपतया परि
णमते तदेकस्यैव चित्तस्यानुसंधातृत्वेनान्वितत्वात् कार्यकारणभावो न दुर्घटः भवानंतर्यं कार्यकारणभावश्च वा
सनानां यदानुप्रथममेवानुभवः प्रवर्तते तदा किं वासनानिमित्तक उत निर्निमित्त इति शंकामपनेतुमाह तासा धिव
मनादित्वमाशिषो नित्यत्वात् तासां वासनानामनादित्वं न विद्यते आदिर्यस्य तस्य भावस्तत्त्वं आसामादिर्ना ३८
स्तीत्यर्थः कुत इत्यत आह आशिषो नित्यत्वात् येयमाशीर्महामोहरूपा सदैव सुखसाधनानि मे भूयासुः मा कदा

च नेतैर्वियोगो मभूदिति यः संकल्पविशेषो वासनानां कारणं तस्य नित्यत्वादनादित्वादित्यर्थः एतदुक्तं भवति का
रणस्य संनिहितत्वादनुभवसंस्कारादीनां कार्याणां प्रवृत्तिः केन वार्यते अनुभवसंस्काराद्यनुविद्धं संकोचविका
सधर्मि चित्तं तत्तदभिव्यंजकविपाकलाभात् तत्तत्फलरूपतया परिणमत इत्यर्थः आसामानंत्याद्धानं कथं संभवती
त्याशंक्य हानोपायमाह हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः वासनानामनंतरानुभवो हेतुः
तस्यानुभवस्य रागादयः तेषामविद्येति साक्षात् पारंपर्येण हेतुः फलं शरीरादि स्मृत्यादयश्च आश्रयो बुद्धिसत्वं
आलंबनं यदेवानुभवस्य तदेव वासनानां अतस्तैर्हेतुफलाश्रयालंबनैरनंतानामपि वासनानां संगृहीतत्वात्तेषां हेत्वा
दीनामभावे ज्ञानयोगाभ्यां दग्धबीजत्वे विहिते निर्मूलत्वान्न वासनाः प्ररोहंति न कार्यमारभंत इति तासामभावः ननु
प्रतिक्षणं चित्तस्य नश्वरत्वादांतरतमत्वोपलब्धेर्वासनानां तत्फलानां च कार्यकारणभावेन युगपदभावित्वाद्भेदे क
थमेकत्वमित्याशंक्य एकसमर्थनमाह अतीतानागतं स्वरूपं नास्त्यध्वभेदात्तद्धर्माणां इहात्यंतमसतां भावानां
उत्पत्तिर्न युक्तिमती तेषां सत्त्वसंबंधायोगात् नहि शशविषाणादीनां क्वचिदपि सत्त्वसंबंधो दृष्टः निरुपाख्येच

कार्यंकिमुद्दिश्यकारणानिप्रवर्त्तेरन् नहिविषयमनालोच्यकश्चित्प्रवर्त्तते सतामपिविरोधान्नाभावसंबंधोस्ति
यत्स्वरूपेणलब्धसत्ताकंतत्कथंनिरूपाख्यतामभावसत्वरूपतांभजते नविरुद्धंरूपंस्वीकरोतीत्यर्थः तस्मात्सता
मभावासंभवादसतांचोत्पत्त्यसंभवात् तैस्तैर्धर्मैर्विपरिणममानोधर्मी सदैकरूपतयावतिष्ठते धर्मास्तुत्र्यधिक
त्वेनत्रैकालिकत्वेनव्यवस्थिताः स्वस्मिन् स्वस्मिन् व्यवस्थितानस्वरूपंत्यजंतिवर्त्तमानेध्वनिव्यवस्थिताः केवलंभोग्य
तांभजंतेतस्माद्धर्माणामतीतानागताद्यध्वभेदाः तेनैवरूपेणकार्यकारणभावोस्मिन्दर्शनेप्रतिपाद्यते तस्मा
दपवर्गपर्यंतमेकमेवचित्तंधर्मितयानुवर्त्तमानंननिह्नोतुंपार्यते तएतेधर्मधर्मिणः किंरूपाइत्यतआह तेव्यक्त
सूक्ष्मागुणात्मानः यएतेधर्मधर्मिणः प्रोक्तास्तेव्यक्तसूक्ष्मभेदेनव्यवस्थिताः येगुणाः सत्वरजस्तमोरूपास्तदा
त्मानस्तत्स्वभावास्तत्परिणामरूपाइत्यर्थः यतः सत्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्वासांबाह्याभ्यंतरभे शिव
दभिन्नानांभावव्यक्तीनामन्वयानुगमोदृश्यते यद्यदन्वयितत्तत्परिणामरूपंदृष्टं यथाघटादयोमृदन्विताम् ३९
त्परिणामरूपाः यद्येतेत्रयोगुणाः सर्वत्रमूलकारणंकथमेकोधर्मीतिव्यपदेशइत्याशंक्याह परिणामैकत्वाद्व

स्तुतत्वं यद्यपित्रयोगुणास्तेषामंगांगिभावगमनलक्षणोयः परिणामः क्वचित्सत्वमंगि क्वचिद्रजः क्वचित्तमइत्येवं
रूपस्तस्यैकत्वाद्वस्तुनस्तत्वमेकत्वमुच्यते यथाइयंपृथिवीअयंवायुरित्यादि ननुज्ञानव्यतिरिक्तेसत्यर्थेवस्त्वेक
मनेकंवावक्तुंयुज्यते यदाविज्ञानमेववासनावशात्कार्यकारणभावेनावस्थितंतथातथाप्रतिभातितदाकथमेतच्छक्य
तेवक्तुमित्याशंक्याह वस्तुसाम्येचित्तभेदात्तयोर्विविक्तः पंथाः तयोर्ज्ञानज्ञेययोर्विविक्तः पंथाः विविक्तोमार्ग
इतियावत् कथंवस्तुसाम्येचित्तभेदात् समानेवस्तुनिस्त्र्यादावुपलभ्यमानेनानाप्रमातॄणांचित्तस्यभेदः सुखदुःख
मोहरूपतयातदुपलभ्यते तथाह्येकस्यांरूपलावण्यवत्यांयोषित्युपलभ्यमानायांसरागस्यसुखमुत्पद्यते सपत्न्या
स्तुद्वेषः परिव्राजकादेर्घृणाइत्येकस्मिन्नपिवस्तुनिनानाविधचित्तोदयात् कथंचित्कार्यत्वंवस्तुनः एकचित्तकार्यत्वेत्वे
करूपतयैवावभासेत किंचचित्तकार्यत्वेवस्तुनोस्मदादयस्यचित्तस्यतद्वस्तुकार्यंतस्मिन्नर्थांतरव्यासक्तेचित्तेतद्वस्तुन
किंचित्स्यात् भवत्विति चेत् नतदेवकथमन्यैर्बहुभिरुपलभ्येत उपलभ्यतेच तस्मान्नचित्तकार्यं अथयुगपद्ब
हुभिःसोर्थः क्रियतेतदाबहुनिर्मितस्यतस्यार्थस्यैकनिर्मितावैलक्षण्यंस्यात् यदिवैलक्षण्यंनेष्यतेतदाकार

णभेदे सति कार्यभेदस्याभावे निर्हेतुकमेकरूपं वा जगत्स्यात् एतदुक्तं भवति सत्यपि भिन्ने कारणे यदि कार्यभेदस्त
दा समग्रं जगन्नानाविधकारणजन्यमेकरूपं स्यात् कारणभेदाननुगमात् स्वातंत्र्ये निर्हेतुकं स्यात् यद्येवं क
थं तेन त्रिगुणात्मना अर्थेन एकस्यैव प्रमातुः सुखदुःखमोहमयानि ज्ञानानि जन्यंते मैवं यथार्थस्त्रिगुणस्तथा चित्त
मपि त्रिगुणं यस्य चार्थप्रतिभासोत्पत्तौ धर्माधर्मादयः सहकारिकारणं तदुद्भवाभिभववशात् कदाचित् चित्तस्य तेन तेन
रूपेणाभिव्यक्तिः तथा च कामुकस्य सन्निहितायां योषिति धर्मसहकृतं चित्तं सत्वस्यांगितया परिणममानं सुखमयं
भवति तदेवाधर्मसहकारि रजोंगितया दुःखरूपं सपत्नीमात्रस्य भवति तीव्राधर्मसहकारि तया तमसोंगित्वेन
कोपनायाः सपत्न्याः मोहमयं भवति तस्माद्विज्ञानव्यतिरिक्तोस्ति बाह्योर्थः तदेवं न विज्ञानवस्तुनोस्तादात्म्यं विरो
धान्न कार्यकारणभावः कारणभेदेऽसत्यपि कार्यभेदप्रसंगादिति ज्ञानात् व्यतिरिक्तत्वमर्थस्य व्यवस्थापिते यद्येवं शिव
ज्ञानं चेत् प्रकाशकत्वात् ग्रहणस्वभावं अर्थश्च प्रकाश्यत्वात् ग्राह्यस्वभावस्तत्कथं युगपत् सर्वानर्थान् न गृह्णाति ४०
वा स्मरतीत्याशंक्य परिहारं वक्तुमाह तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातं तस्यार्थस्योपरागादा

कारसमर्पणाच्चित्ते बाह्यं वस्तु ज्ञातमज्ञातं च भवति अयमर्थः सर्वः पदार्थ आत्मज्ञानसामग्रीमपेक्षते नीलादिज्ञानं चोप
जायमानमिंद्रियप्रणालिकया समागतमर्थोपरागं सहकारिकारणत्वेनापेक्षते व्यतिरिक्तस्यार्थस्य संबंधाभावात् ग्र
हीतुमशक्यत्वात् ततश्च येनैवार्थेनास्य ज्ञानस्य स्वस्वरूपोपरागः कृतः तमेवार्थं ज्ञानं व्यवहारयोग्यतां नयति ततश्च सो
र्थो ज्ञात उच्यते येनाकारो न समर्पितः सोऽज्ञातत्वेन व्यवह्रियते यस्मिन्ननुभूतेर्थे सदृशादिरर्थः संस्कारमुद्बोधयन्
सहकारिकारणत्वं प्रतिपद्यते तस्मिन्नेवार्थे स्मृतिरुपजायत इति न सर्वत्र ज्ञानं नापि सर्वत्र स्मृतिरिति न कश्चिद्विरोधः
यद्येवं प्रमातापि पुरुषो यस्मिन् काले नीलं संवेदयति न तस्मिन्नेव काले पीतमतस्तस्यापि कादाचित्कत्वे गृहीतृरू
पत्वादाकारग्रहणे परिणामित्वं प्राप्तमित्याशंक्य परिहर्तुमाह सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वा
त् या एताश्चित्तस्य प्रमाणविपर्ययादिरूपा वृत्तयः तास्तत्प्रभोः तस्य चित्तस्य ग्रहीतुः पुरुषस्य सदा सर्वकालमेव
ज्ञेयाः तस्य चिद्रूपतया अपरिणामात् परिणामित्वाभावादित्यर्थः यद्यसौ परिणामी स्यात् तदा परिणामस्य कदाचि
त्कत्वात् प्रमातुश्चित्तवृत्तीनां सदा ज्ञातत्वं नोपपद्येत अयमर्थः पुरुषस्य चिद्रूपस्य सदैवाधिष्ठातृत्वेन व्यवस्थितस्य

यदंतरंगंज्ञेयंनिर्मलंसत्वंतस्यापिसदैवावस्थितत्वेनयेनार्थेनोपरक्तंभवतितथाविधस्यदृश्यस्यसदैवचिच्छाया
संक्रांतिसद्भावःतस्यांसत्यांसिद्धंसदाज्ञातत्वमितिनकदाचित्परिणामित्वाशंका ननुचित्तमेवसत्वोत्कर्षाद्यदि
प्रकाशकंतदास्वपरप्रकाशकत्वादात्मानमर्थंचप्रकाशयतीतितावतैवव्यवहारसमाप्तेःकिंतद्ग्रहीत्रंतरेणेत्याशंकाम
पनेतुमाह नतत्स्वाभासंदृश्यत्वात् तच्चित्तंस्वाभासंस्वप्रकाशकंनभवतिपुरुषवेद्यंभवतीतियावत् कुतःदृश्यत्वात्
यत्किलदृश्यंतत्द्रष्टृवेद्यंदृष्टंयथाघटादि चेद्यंचचित्तं तस्मान्नस्वाभासं ननुसाध्याविशिष्टोयंहेतुःदृश्यत्वमे
वचित्तस्यासिद्धं किंतुस्वबुद्धिसंवेदनद्वारेणपुरुषाणांहिताहितप्राप्तिपरिहाररूपावृत्तयोदृश्यंते तथाहि क्रुद्धो
हंभीतोहं मत्रमेरागइत्येवमाद्याःसंविदोबुद्धेरसंवेदनेनोपपन्नाइत्याशंकांनिरसितुमाह एकसमयेचोभयानव
धारणं अर्थस्यसंविन्निरिदंतयाव्यवहारयोग्यतापादनं अयमर्थः सुखहेतुर्दुःखहेतुर्वेतिबुद्धेश्चसंविदियमि शिव
त्येवमाकारेणसुखदुःखरूपतयाव्यवहारक्षमतापादनंएवंविधंचव्यापारद्वयं अर्थप्रत्यक्षताकालेनयुगपत्कर्तुं ४१
शक्यंविरोधात् नहिविरुद्धयोर्व्यापारयोर्युगपत्संभवोस्तिअतएकस्मिन्कालेउभयस्यरूपस्यअर्थस्यचावधा

रयितुमशक्यत्वात् नचित्तंस्वप्रकाशकमित्युक्तं किंचएवंविधव्यापारद्वयायत्तस्यफलद्वयस्यासंवेदनात् बहिर्मुख
तयैवार्थनिष्ठत्वेनचित्तस्यसंवेदनादर्थनिष्ठमेवफलंनस्वनिष्ठमित्यर्थः ननुभवतुबुद्धेःस्वयंग्रहणंबुद्ध्यंतरेण
भविष्यतीत्याशंक्याह चित्तांतरदृश्येबुद्धिबुद्धेरतिप्रसंगःस्मृतिसंकरश्च यदिबुद्धिर्बुद्ध्यंतरेणवेद्येततदा
साबुद्धिःस्वयंबुद्ध्यंतरेप्रकाशयितुमसमर्थेतितस्याग्राहकंबुद्ध्यंतरंकल्पनीयं तस्याप्यन्यदित्यनवस्थानात् पुरुषा
युषेणाप्यर्थप्रतीतिर्नस्यात् नहिप्रतीतावप्रतीतायामर्थःप्रतीतोभवतिस्मृतिसंकरश्च तस्याप्यन्यदितिप्राप्नोति रूपे
रसेवासमुत्पन्नायांबुद्धौतद्ग्राहिकाणामनंतानांबुद्धीनांसमुत्पत्तेःबुद्धिजनितैःसंस्कारैःयुगपद्बह्व्यःस्मृतयःक्रि
यंतेतदाबुद्धेरपर्यवसानाद्बुद्धिस्मृतीनांयुगपदुत्पत्तेःकस्मिन्नर्थेस्मृतिरियमुत्पन्नेतिज्ञातुमशक्यत्वात्स्मृतीनांसंक
रःस्यादियंरूपस्मृतिरियंरसस्मृतिरितिनज्ञायेत ननुचबुद्धेःस्वप्रकाशत्वाभावेबुद्ध्यंतरेणवासंवेदनेकथमयंविषयसं
वेदनरूपोव्यवहारइत्याशंक्यस्वसिद्धांतमाह चितेरप्रतिसंक्रमायास्तदाकारापत्तौस्वबुद्धिसंवेदनं पुरुषश्चि
द्रूपत्वाच्चितिःसाअप्रतिसंक्रमानविद्यतेप्रतिसंक्रमोन्यत्रगमनंयस्याःसातथोक्ता। अन्येनासंकीर्णेतियावत्

यथागुणाअंगांगिभावगमनलक्षणेपरिणामेअंगिनंगुणमुपसंक्रामंतितद्रूपताभिवापद्यंते यथावालोकेपरमा
णवःप्रसरंतोविषयमारूपयंतिनैवंचितिशक्तिःतस्याःसर्वदैकरूपतयास्वप्रतिष्ठत्वेनव्यवस्थितत्वात् अतस्त
त्संनिधानेयदाबुद्धिस्तदाकारतामापद्यते चेतनेवोपजायते बुद्धिवृत्तिप्रतिसंक्रांताचयदाचिच्छक्तिर्बुद्धिवृत्त्या
वेशात् तथासंपद्यते तदाबुद्धेःस्वस्यात्मनोवेदनंभवतीत्यर्थः इत्थंस्वसंविदितच्चित्तंसर्वार्थग्रहणसामर्थ्येनस
कलव्यवहारनिर्वाहक्षमंभवतीत्याह द्रष्टृदृश्योपरक्तंचित्तंसर्वार्थं द्रष्टापुरुषस्तेनोपरक्तं तत्संन्निधानेतद्रू
पताभिवप्राप्तंदृश्योपरक्तंगृहीतविषयाकारपरिणामंयदाभवति तदातदेवसर्वार्थग्रहणसमर्थंजायतेयथानि
र्मलंस्फटिकंदर्पणाद्येवप्रतिबिंबग्रहणसमर्थमेवंरजस्तमोभ्यामनभिभूतसत्वंशुद्धत्वाच्चिच्छायाग्रहणसम
र्थंभवति नपुनरशुद्धत्वाद्रजस्तमसी तदानभिभूतंरजस्तमोरूपमसंगितयासत्वंनिश्चलदीपशिखाकारंस शिव
दैवएकरूपतयापरिणममानंचिच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते यथाअयस्कांतसंनिधानेलो ४२
हस्यचलनंत्वमाविर्भवति एवंचिद्रूपपुरुषसंनिधानेसत्वस्याभिव्यंग्यमभिव्यज्यतेचैतन्यं अतएवास्मिन्

दर्शनेद्वेचिच्छक्तीनित्योदिताभिव्यंग्याच नित्योदिताचिच्छक्तिःपुरुषस्तत्संनिधानादभिव्यक्तमभिव्यंग्यंचैतन्यं
सत्वमाभिव्यंग्याचिच्छक्तिः तदत्यंतसंनिहितत्वादंतरंगंपुरुषस्यभोग्यतांप्रतिपद्यते तदेवशांतब्रह्मवादिभिःसां
ख्यैःपुरुषस्यपरमात्मनोधिष्ठेयकर्मनुरूपंसुखदुःखभोक्तृतयाव्यपदिश्यते यत्वनुद्रिक्तत्वादेकस्यापिगुण
स्यकदाचित्कस्यचिदंगित्वात् त्रिगुणंप्रतिक्षणपरिणममानंसुखदुःखमोहात्मकमनिर्मलं तस्मिन्कर्मात्मरूपेशुद्धे
सत्वेस्वाकारसमर्पणद्वारेणसंवेद्यतामापादयन्नियच्छुद्धमाद्यंचित्तसत्वमेकतःप्रतिसंक्रांतचिच्छायममन्यतोगृहीतवि
षयाकारेणवृत्तेनोपढौकितस्वाकारंचित्संक्रांतिबलाच्चेतयमानं वास्तवचैतन्याभावेपिसुखदुःखभोगमनुभव
ति सएवभोगोत्यंतसांनिध्येनविवेकाग्रहणादभोक्तुरपिपुरुषस्यभोगइतिव्यपदिश्यते अनेनैवाभिप्रायेणविंध्यवा
सिनोक्तंसत्वतथात्वमेवपुरुषीयत्वमिति अन्यत्रापिप्रतिबिंबेप्रतिबिंबमानच्छायासादृश्यात् छायांतरोद्भवःप्रति
बिंबशब्देनोच्यते एवंसत्वेपिपौरुषेयचिच्छायासदृशस्वकीयचिच्छायांतराभिव्यक्तिःप्रतिबिंबशब्दार्थः ननुप्रति
बिंबनंनामनिर्मलस्यनियतपरिणामस्यनिर्मलेदृष्टं यथामुखस्यदर्पणे अत्यंतनिर्मलस्यव्यापकस्यचपुरुषस्य

तस्मादनिर्मलसत्वेकथंप्रतिबिंबनमुत्पद्यते उच्यते प्रतिबिंबनस्यस्वरूपमनवगच्छता भवतेदमभ्यधायियेवसत्व
गतायाअभिव्यंग्यायाश्चिच्छक्तेः पुरुषस्यसान्निध्येभिव्यक्तिः सैवप्रतिबिंबनमुच्यते यादृशीपुरुषगताचिच्छ
क्तिस्तच्छायात्राप्याविर्भवति यद्यप्युच्यतेतन्निर्मलः पुरुषः कथमनिर्मलेसत्वेप्रतिसंक्रामति तदप्यनैकांतिकंनै
र्मल्यादपकृष्टेपिजलादौआदित्यादयः प्रतिसंक्रांताः समुपलभ्यंते यदप्युक्तंअनवच्छिन्नस्यनास्तिप्रतिसंक्रां
तिरिति तदप्यनुपपन्नं व्यापकस्याप्याकाशस्यदर्पणादौप्रतिसंक्रांतिदर्शनात् एवंसतिनकाचिदनुपपत्तिः
प्रतिबिंबदर्शनस्य ननुसात्विकपरिणामरूपेबुद्धिसत्वेपुरुषसंनिधानाभिव्यंग्यायाः चिच्छक्तेर्बाह्यार्थाकारसंक्रां
तौपुरुषस्यसुखदुःखरूपोभोगइत्युक्तंतदनुपपन्नं तदेवंविधसत्वेप्रकृतावपरिणतायांकथंसंभवतिकिमर्थंच
तस्याः परिणामः अथोच्यते पुरुषार्थोपभोगसंपादनंतयाकर्त्तव्यं अतः पुरुषार्थकर्त्तव्यतयातस्याः युक्तएवप शिव
रिणामः तन्नोपपन्नं पुरुषार्थकर्तव्यतायाएवानुपपत्तेः पुरुषार्थेमियाकर्तव्यइत्येवंविधोध्यवसायः पुरुषा ४३
र्थकर्त्तव्यतोच्यते जडायाश्चप्रकृतेः कथंप्रथमंमेवैवंविधोध्यवसायः अस्तिचेदध्यवसायः कथंजडत्वं अत्रोच्य

ते अनुलोमप्रतिलोमलक्षणपरिणामद्वयेसहजंशक्तिद्वयमस्तितदेवपुरुषार्थकर्त्तव्यतोच्यते साचअचेतनायाअ
पिप्रकृतेः सहजैव तत्रमहदादिमहाभूतपर्यंतो ऽस्याबहिर्मुखतयानुलोमः परिणामः पुनः स्वकारणानुप्रवेशद्वा
रेणास्मितांतः प्रतिलोमः परिणामः इत्थंचपुरुषस्याभोगपरिसमाप्तेः सहजशक्तिद्वयक्षयात् कृतार्थाप्रकृतिर्नपुनः
परिणाममारभते एवंविधायांचपुरुषार्थकर्त्तव्यतायांजडायाअपिप्रकृतेर्नकाचिदनुपपत्तिः ननुयदीदृशीशक्तिः
सहजैवप्रधानस्यास्तितत्किमर्थंमोक्षार्थिभिर्मोक्षायप्रयत्नः क्रियतेमोक्षस्यानर्थनीयत्वेनतदुपदेशकशास्त्रस्याप्यानर्थ
क्यं उच्यते योयंप्रकृतिपुरुषयोरनादिर्भोग्यभोक्तृभावलक्षणः संबंधः तस्मिन्सतिव्यक्तचेतनायाः प्रकृतेः कर्तृ
त्वाभिमानात् दुःखानुभवेसतिकथमियंदुःखनिवृत्तिरात्यंतिकीममस्यादितिभवत्येवाध्यवसायः अतोदुःखनि
वृत्त्युपायोपदेशकशास्त्रोपदे[illegible]शापेक्षास्त्येवप्रधानस्य तथाभूतमेवचकर्मानुरूपंबुद्धिसत्वेशास्त्रोपदेशस्यविष
यः दर्शनांतरेष्वप्येवंविधएवाविद्यास्वभावः शास्त्रेभिधीयते सचमोक्षायप्रयतमानएवंविधमेवशास्त्रोपदेशंसह
कारिणमपेक्ष्यमोक्षाख्यंफलमासादयति सर्वाण्येवचकार्याणिप्राप्तायांसामग्र्यामात्मानंलभंते अस्यचप्रति

क्षोभपरिणामद्वारेणोपायस्य मोक्षाख्यस्य कार्यस्येदृश्येव सामग्री प्रमाणेन निश्चिता प्रकारान्तरेणानुपपत्तेः अन
स्तांविनाकथंभवितुमर्हति अतःस्थितमेतत्संक्रान्तविषयोपरागमभिव्यक्तचिच्छायंबुद्धिसत्वंविषयनिश्चयद्वारे
णसमग्रांलोकयात्रांनिर्वाहयतीति एवंविधमेवचित्तंपश्यन्तोभ्रान्ताःस्वसंवेदनंचित्तंचित्तमात्रंचजगदित्येवंब्रुवाणाः
प्रतिबोधिताभवंति ननु यद्येवंविधादेवचित्तात्सकलव्यवहारनिर्वृत्तिः कथंप्रमाणशून्योद्रष्टाभ्युपगम्यतइत्या
शंक्यद्रष्टरिप्रमाणमाह तदसंख्येयवासनाभिश्चित्रमपिपरार्थंसंहत्यकारित्वात् तदेवचित्तंसंख्यातुमशक्या
भिर्वासनाभिश्चित्रमपिनानारूपमपिपरार्थंपरस्यस्वामिनोभोक्तुर्भोगापवर्गलक्षणमर्थंसाधयतीति कुतःसंह
त्यकारित्वात् संहत्यसंभूयमिलित्वार्थक्रियाकारित्वात् यच्चसंहत्यार्थक्रियाकारितत्परार्थंदृष्टं यथाशयना
सनादिसत्वरजस्तमांसिचचित्तलक्षणपरिणामभांजिसंहत्यकारीणिअतःपरार्थानि यश्चपरःसपुरुषः ननु शिव
चयादृशेनशयनादिनापरेणशरीरवतापरार्थत्वमुपलब्धंतद्दृष्टान्तबलेनतादृशएवपरःसिध्यतियादृशश्चभ ४४
वतापरोऽसंहतरूपोऽभिप्रेतस्तद्विपरीतस्यसिद्धेरनिष्टविषयोहेतुः उच्यते यद्यपिसामान्येनपरार्थमात्र

त्वेनव्याप्तिर्गृहीतातथापिसत्वादिविलक्षणधर्मिपर्यालोचनयातद्विलक्षणएवभोक्तापरःसिध्यति यथाचंदनवतिशि
खरिणिविलक्षणाद्धूमाद्वह्निरनुमीयमानइतरवह्निविलक्षणश्चंदनप्रभवःप्रतीयते एवमिहापिविलक्षणस्य
सत्वाख्यस्यभोगस्यपारार्थ्येनानुमीयमानेतथाविधएवभोक्ताधिष्ठातापरश्चिन्मात्ररूपोऽसंहतःसिध्यति यदिचतस्य
परत्वंसर्वोत्कृष्टत्वमेवप्रतीयतेतथापितामसेभ्योविषयेभ्यःप्रकृष्यतेशरीरंप्रकाशरूपेंद्रियाश्रयत्वात् तस्मादपिप्रकृष्य
तइंद्रियाणिततोपिप्रकृष्टंसत्वंप्रकाशरूपंतस्यापियःप्रकाशकःप्रकाशाविलक्षणःसचिद्रूपएवभवतीतिकुतस्तस्य
संहतत्वं इदानींशास्त्रफलंकैवल्यंनिर्णेतुंदशभिःसूत्रैरुपक्रमते विशेषदर्शिनआत्मभावभावनानिवृत्तिः
एवंसत्वपुरुषयोरन्यत्वेसाधितेयस्तयोर्विशेषंपश्यतिअहमस्मादन्यइत्येवंरूपंतस्यसत्वज्ञानचित्तस्वरूपस्यसेत्व
चिंतयाआत्मभावभावनासानिवर्त्ततेचित्तमेवकर्तृज्ञातृभोक्तृइत्यभिमानोनिवर्त्तते तस्मिन्सतिकिंभवतीत्याह
प्रारंभे तदाविवेकनिम्नंकैवल्यप्राग्भारंचित्तं यदस्याज्ञाननिम्नपथंबहिर्मुखंविषयोपभोगफलंचित्तमासीत्तदिदानींवि
वेकनिम्नमार्गमंतर्मुखंकैवल्यप्राग्भारंकैवल्यफलंकैवल्यप्राग्भारंवासंपद्यतइति अस्मिंश्चविवेकवाहिनिचित्तेयेंतरा

याः प्रादुर्भवंति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः तस्मिन् समाधौ स्थि
तस्य छिद्रेष्वंतरालेषु यानि प्रत्ययांतराणि व्युत्थानरूपाणि ज्ञानानि तानि प्राक्तनेभ्यो व्युत्थानानुभवजेभ्यः संस्कारेभ्यो
ऽहं ममेत्येवंरूपाणि क्षीयमाणेभ्योपि प्रभवंति अंतःकरणोच्छित्तिद्वारेण तेषां हानं कर्त्तव्यमित्युक्तं भवति हानोपायः पूर्व
मेवोक्त इत्याह हानमेषां क्लेशवदुक्तं यथा क्लेशानामविद्यादीनां हानं पूर्वमुक्तं तथा संस्काराणामपि कर्त्तव्यं यथा ते
ज्ञानाग्निनास्पृष्टाः दग्धबीजकल्पा न पुनश्चित्तभूमौ प्ररोहं लभंते तथा संस्कारा अपि एवं प्रत्ययांतरानुदयेन स्थिरी
भूतेन समाधौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति तथाविधमुपायमाह प्रसंख्यानेप्यकुसीदस्य सर्वथा विवे
कख्यातेर्धर्ममेघः समाधिः प्रसंख्यानं यावंतो तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनं
तस्मिन् सत्यप्यकुसीदस्य फलमलिप्सोः प्रत्ययांतराणामनुदये सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधि शिव
र्भवति प्रकृष्टमशुक्लकृष्णं धर्मं परपुरुषार्थसाधकं मेहति सिंचतीति धर्ममेघः अनेन प्रकृष्टस्य धर्मस्यैव ज्ञानहेतुत्वमि ४५
त्युपपादितं भवति तस्माद्धर्ममेघात् किं भवतीत्यत आह ततः क्लेशकर्मनिवृत्तिः क्लेशानामविद्यादीनामभिनि

वेशांतानां कर्मणां च शुक्लादिभेदेन त्रिविधानां ज्ञानोदयात् पूर्वकारणनिवृत्त्या निवृत्तिर्भवतीत्यर्थः निवृत्तेषु किं भ
वतीत्यत आह तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्यात् ज्ञेयमल्पं आव्रियते चित्तमित्यावरणानि क्लेशाः ते
भ्योपेतस्य तद्विरहितस्य ज्ञानस्य शरद्गगनप्रतिमस्यानंत्यादनवच्छेदात् ज्ञेयमल्पं गणनास्पदं न भवति अक्ले
शेनैव सर्वं ज्ञेयं जानातीत्यर्थः ततः किमित्यत आह कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां कृतो निष्पादितो
भोगापवर्गलक्षणः पुरुषार्थो यैस्ते कृतार्था गुणाः सत्त्वरजस्तमांसि तेषां परिणाम आपुरुषार्थसमाप्तेरानुलोम्येन प्रा
तिलोम्येन न वांगांगिभावस्थितिलक्षणस्तस्य योसौ क्रमो वक्ष्यमाणः तस्य परिसमाप्तिः निष्ठा न पुनरुद्भवंतीत्यर्थः
क्रमस्योक्तस्य लक्षणमाह क्षणप्रतियोगी परिणामापरांतनिर्ग्राह्यः क्रमः क्षणोऽल्पीयान् कालः तस्य योसौ प्रति
योगी एकक्षणविलक्षणः परिणामापरांतनिर्ग्राह्यः अनुभूतेषु क्षणेषु पश्चात् संकलनाबुद्ध्यैव यो गृह्यते स क्ष
णानां क्रमः उच्यते नह्यननुभूतेषु क्षणेषु क्रमः परिज्ञातुं शक्यः इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरू
र्थ पमाह पुरुषोशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति समाप्तभोगापवर्गलक्षणपुरुषा

र्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुद्भवः यदि वा चितिशक्तेर्वृत्तिसारू
प्यनिवृत्तौ स्वरूपमात्रेणावस्थानं कैवल्यमुच्यते पुनर्बुद्धिसत्वानधिगमे सति स्वरूपमात्रेऽवस्थानं न के
वलमस्मद्दर्शने क्षेत्रज्ञः कैवल्यावस्थायामेवंभूतो दर्शनान्तरेष्वपि विमृष्यमाण एवंरूप एवावतिष्ठते तथा
हि संसारदशायामात्मा कर्तृत्वभोक्तृत्वानुसंधानमयः प्रतीयते अन्यथा यद्ययमेकः क्षेत्रज्ञस्तथाविधो न
स्यात् कृतनाशाकृताभ्यागमप्रसंगश्च यदि येनैव शास्त्रोपदिष्टमनुष्ठितं कर्म तस्यैव भोक्तृत्वं भवेत्तदाहिता
हितप्राप्तिपरिहारार्था प्रवृत्तिः सर्वस्य घटेत सर्वस्यैव व्यवहारस्य हानोपादानलक्षणावस्थानुसंधानेनैव व्याप्तत्वात् व
ज्ञानक्षणानां परस्परभेदे नानुसंधानशून्यत्वात् अनुसंधानाभावे कस्यचिद्व्यवहारस्यानुपपत्तेः कर्ता भोक्तानुसंधाता
यः स आत्मेति व्यवस्थाप्यते मोक्षदशायां तु सकलग्राह्यग्राहकलक्षणव्यवहाराभावाच्चैतन्यमात्रमेव तस्यावशि शिव
ष्यते न च चैतन्यं चितिमात्रत्वेनैवोपपद्यते न पुनरात्मसंवेदनेन यस्माद्विषयग्रहणसमर्थत्वमेव चितेः रूपं नात्मग्राह ४६
कत्वं तथाहि अर्थश्चित्या गृह्यमाणोऽयमिति गृह्यते स्वरूपं गृह्यमाणमहमिति न पुनर्युगपद्बहिर्मुखतान्तर्मुख

तालक्षणं व्यापारद्वयं परस्परविरुद्धं कर्तुं शक्यं अत एकस्मिन्समये व्यापारद्वयस्य कर्तुमशक्यत्वाच्चिद्रूपतैवावशि
ष्यते अतो मोक्षावस्थायां निवृत्ताधिकारेषु गुणेषु चिन्मात्ररूप एवात्मावतिष्ठत इत्येव युक्तं संसारदशायां तु प
वंभूतस्यैव कर्तृत्वं भोक्तृत्वमनुसंधातृत्वं च सर्वमुपपद्यते तथाहि योयं प्रकृत्या सहानादिर्नैसर्गिकोस्य भोग्यभोक्तृ
भावलक्षणः संबंधोऽविवेकख्यातिमूलः तस्मिन्सति पुरुषार्थकर्तव्यतारूपशक्तिद्वयसद्भावे या महदादिभावेन प
रिणतिः तस्यां संयोगे सति यदात्मनोऽधिष्ठातृत्वं चिच्छायासमर्पणसामर्थ्यं बुद्धिसत्वस्य च संक्रान्तचिच्छायाग्रहणसाम
र्थ्यं चिदवष्टब्धायाश्च बुद्धेर्योयं कर्तृत्वभोक्तृत्वाध्यवसायः तत एव सर्वस्यानुसंधानपूर्वस्य व्यवहारस्य निष्पत्तेः कि
मन्यैः कल्पनाजालैः यदि पुनरेवंभूतमंगीव्यतिरेकेण पारमार्थिकमात्मनः कर्तृत्वाद्यंगीक्रियेत तदास्य परिणामि
त्वप्रसंगः परिणामित्वाच्चानित्यत्वे तस्यात्मत्वमेव न स्यात् न ह्येकस्मिन्नेव समये एकेनैव रूपेण परस्परविरुद्धावस्था
नुभवः संभवति तथाहि यस्यामवस्थायामात्मसमवेतसुखे समुत्पन्ने तस्यानुभवितृत्वेन तस्यामेवावस्थायां दुःखा
नुभवितृत्वं अतोऽवस्थानानात्वात्तदभिन्नस्यावस्थावतोऽपि नानात्वं नानात्वेन च परिणामित्वान्नात्मत्वं नापि नित्य

त्वं अतएव शांतब्रह्मवादिभिः सांख्यैरात्मनः सदैव संसारदशायां मोक्षदशायां चैकरूपत्वमंगीक्रियते येतु वेदांतवादिनः
चिदानंदमयत्वमात्मनो मोक्षे मन्यंते तेषामयुक्तः पक्षः तथाहि आनंदस्य सुखरूपत्वात् सुखस्य च सदैव संवेद्यतया
चप्रतिभासात् संवेद्यमानत्वं च संवेदनव्यतिरेकेणानुपपन्नमिति संवेदनसंवेद्ययोरभ्युपगमाद्द्वैतहानिः अथ सु
खात्मत्वमेव तस्योच्यते तद्विरुद्धधर्माध्यासादनुपपन्नं नहि संवेद्यं संवेदनं चैकं भवितुमर्हति किंच अद्वैतवादि
भिः कर्मात्मपरमात्मभेदे नात्मा द्विविध इष्यते तत्र येनैव रूपेण सुखदुःखभोक्तृत्वं कर्मात्मनस्तेनैव रूपेण परमात्मनः स्या
त् तदा कर्मात्मवत्परमात्मनः परिणामित्वमविद्यास्वभावत्वं च स्यात् अथ न तस्य साक्षात् भोक्तृत्वं किंतु तदुपष्टंभकि
तमुदासीनतयाधिष्ठातृत्वं न स्वीकरोति तदास्मद्दर्शनानुप्रवेशः आनंदरूपता च पूर्वमेव निराकृता किंचाविद्यास्व
भावत्वे निःस्वभावत्वात्कर्मात्मनां कः शास्त्राधिकारी न तावन्नित्यनिर्मुक्तत्वात्परमात्मा नाप्यविद्यास्वभावत्वात्कर्मात्मा शिव
ततश्च सकलशास्त्रवैयर्थ्यप्रसंगः अविद्यामयत्वे च जगतोंगीक्रियमाणे कस्याविद्येति विचार्यतां न तावत्परमा ४७
त्मनो नित्यनिर्मुक्तत्वात् विद्यारूपत्वाच्च कर्मात्मनोपि निःस्वभावतया शशविषाणप्रख्यत्वे कथमविद्यासंबंधः

अथोच्यते एतदेवाविद्याया अविद्यात्वं यदविचारितरमणीयत्वं नाम यैव हि विचारेण दिनकरकरस्पृष्टनीहारवद्वि
लयमुपयाति सैवाविद्येत्युच्यते नैवं यद्वस्तु किंचित्कार्यं करोति तदवश्यं कुतश्चिद्भिन्नमभिन्नं वा वक्तव्यं अवि
द्यायाश्च संसारलक्षणप्रपंचकार्यकर्तृत्वमवश्यमंगीकर्तव्यं तस्मिन्सत्यपि यद्यनिर्वाच्यत्वमुच्यते तदा कस्यचि
दपि वाच्यत्वं न स्यात् ब्रह्मणोप्यवाच्यत्वप्रसक्तिः तस्मादधिष्ठातृरूपताव्यतिरेकेण नान्यदात्मनो रूपमुपपद्यते
अधिष्ठातृत्वं च चिद्रूपत्वमेव तद्व्यतिरिक्तस्य धर्माधर्मविज्ञानानुपपत्तेः यैरपि नैयायिकादिभिरात्मा चेतनायोगाच्चे
तन इष्यते चेतनापि तस्य मनःसंयोगजा तथाहि ज्ञानप्रयत्नादयो गुणास्तस्य व्यवहारदशायामात्ममनःसंयोगा
दुत्पद्यंते तैरेव च गुणैः स्वयं ज्ञाता कर्ता भोक्तेति व्यपदिश्यते मोक्षे तु मिथ्याज्ञाननिवृत्तौ तन्मूलानां दोषाणामपि नि
वृत्तेस्तेषां बुद्ध्यादीनां विशेषगुणानामत्यंतोच्छित्तेः स्वरूपमात्रप्रतिष्ठत्वमात्मनोंगीकृतं तेषामयुक्तः पक्षः यत
स्तस्यां दशायां किमात्मन आत्मनित्यत्वव्यापकत्वादयो गुणा आकाशादीनामपि संति अतस्तद्वैलक्षण्येनात्मनः
किंचिद्रूपमवश्यमंगीकर्तव्यं आत्मत्वजातियोग इति चेत् सर्वस्यैव हि जातियोगः संभवति अतो जडेभ्यो वैलक्ष

णमात्मनोवश्यमंगीकर्तव्यं तच्चाधिष्ठातृत्वंचिद्रूपत्वेवघटतेनान्यथा येरपिमीमांसकैःकर्मकर्तृरूपआत्मांगीक्रि
यतेतेषामपिनयुक्तःपक्षः तथाहि अहंप्रत्ययग्राह्यआत्माइतितेषांप्रतिज्ञा अहंप्रत्ययेचकर्तृत्वंकर्मत्वंचात्मन
एव नचैतद्विरुद्धत्वादुपपद्यते कर्तृत्वंप्रमातृत्वंकर्मत्वंचप्रमेयत्वं नचैतद्विरुद्धधर्माध्यासएकस्यघटतेयद्विरुद्ध
धर्माध्यस्तंननदेकं यथाभावाभावौ विरुद्धेचकर्तृत्वकर्मत्वे अथोच्यते नकर्तृत्वकर्मत्वयोर्विरोधःकिंतुकर्तृत्वाकर
णत्वयोः केनैतदुक्तंविरुद्धधर्माध्यासस्यतुल्यत्वात्कर्तृत्वकरणत्वयोरेवविरोधोनकर्तृत्वकर्मत्वयोः तस्मादहं
प्रत्ययग्राह्यत्वंपरिहृत्यात्मनोधिष्ठातृत्वमेवोपपन्नं तच्चचेतनत्वमेव येरपिद्रव्यबोधपर्यायभेदात्मनोव्यापकस्य
शरीरपरिमाणस्यपरिणामित्वमिष्यतेतेषामुत्थानपराहतएवपक्षः परिणामित्वेचिद्रूपताहानिःचिद्रूपत्वाभावेकि
मात्मनस्त्रात्मत्वं तस्मादात्मनआत्मत्वमिच्छताचिद्रूपत्वमेवात्मनोंगीकर्तव्यं तच्चाधिष्ठातृत्वमेव केचित्तुक शिव
र्तृरूपमेवात्मानमिच्छंति तथाहि विषयसंनिध्येयाज्ञानलक्षणाक्रियासमुत्पन्नातस्याविषयसंवित्तिःफलं ४८
तस्याश्चफलरूपायांसंवित्तोस्वरूपेप्रकाशरूपतयाप्रतिभासतेविषयश्चग्राह्यतयाआत्माग्राहकत्वेनघटमहंजा

DR BHAU DAJI MEMORIAL

नामीत्यनेनप्रकारेणतस्याःसमुत्पत्तेःक्रियायाश्चकारणंकर्तैवभवतीत्यतःकर्तृत्वंभोक्तृत्वंचात्मनोरूपमिति तदनु
पपन्नं यस्मात्तासांसंवित्तीनांसकिंकर्तृत्वंयुगपत्प्रतिपद्यतेक्रमेणवा युगपत्कर्तृत्वेक्षणांतरेकर्तृत्वंतस्यानस्यात्
अथक्रमेणकर्तृत्वंतदेकरूपस्यनघटतेकेनरूपेणचेनस्यकर्तृत्वंतदाएकस्यरूपस्यसदैवसन्निहितत्वात्सर्वमेवफलमे
करूपंस्यात् अथनानारूपेणतस्यकर्तृत्वंतदापरिणामित्वान्नचिद्रूपत्वं अतश्चिद्रूपत्वमात्मनइच्छतानसाक्षात्कर्तृत्व
मंगीकर्तव्यंयादृशमस्माभिश्चकर्तृत्वमात्मनःप्रतिपादितंकूटस्थनित्यचिद्रूपस्यतदेवोपपन्नं एतेनस्वप्रकाशस्या
त्मनोविषयसंवित्तिद्वाराग्राहकत्वमभिव्यज्यतइतियेवदंति तेप्यनेनैवनिराकृताः केचिद्विमर्शात्मकत्वेनात्मनःशै
विन्मे द्रूमयत्वमिच्छंति तथाहिनविमर्शव्यतिरेकेणचिद्रूपतानिरूपयितुंशक्याजडात्किलवैलक्षण्यंचिद्रूपत्वमुच्यते
तच्चविमर्शव्यतिरेकेणनिरूप्यमाणंनान्यथावतिष्ठते तदनुपपन्नं इदमित्थमेवंरूपमितियोविचारःसविमर्शउ
च्यतेसचास्मितान्यतिरेकेणोत्थानमेवनलभते यथाह्यात्मनिउपजायमानोविमर्शः अहमेवंभूतइत्यनेनाकारे
णसंवेद्यतेतनश्चाहंशब्दभिन्नस्यात्मलक्षणस्यार्थस्यतत्रस्फुरणान्नविकल्परूपतातिक्रमः विकल्पश्चाप्यव

सायात्माबुद्धिधर्मैर्निर्विद्धर्मः कूटस्थनित्यत्वेनचित्तेः सदैकरूपत्वान्नाहंकारानुप्रवेशः तदनेनसविमर्षत्वमात्मनः
प्रतिपादयताबुद्धिरेवात्मत्वेनश्रोत्याप्रतिपादितानप्रकाशात्मनः परस्यपुरुषस्यस्वरूपमवगतमिति इत्थंसर्वेष्वपि
दर्शनेष्वधिष्ठातृत्वंविहायनान्यदात्मनोरूपमुपपद्यते अधिष्ठातृत्वंचचिद्रूपत्वंतच्चजडाद्वैलक्षण्यमेव चिद्रूप
तयायदधितिष्ठतितदेवभोग्यतांनयतिनियच्चतेनाधिष्ठितंतदेवसकलव्यवहारयोग्यंभवति एवंचसतिकृतकृत्य
त्वात्प्रधानस्यव्यापारनिवृत्तौयदात्मनःकैवल्यमस्माभिरुक्तं तद्विहायदर्शनांतराणामपिनान्यागतिः तस्मादिदमे
वयुक्तं वृत्तिसारूप्यपरिहारेणस्वरूपप्रतिष्ठाचितिशक्तिःकैवल्यं तदेवंसिद्ध्यंतरेभ्योविलक्षणांसर्वसिद्धिमू
लभूतांसमाधिसिद्धिमभिधायजात्यंतरपरिणामलक्षणस्यासिद्धिविशेषस्यप्रकृत्यापूरमेवकारणमुपपाद्यधर्मा
दीनांप्रतिबंधकनिवृत्तिमात्रएवसामर्थ्यमितिप्रदर्श्यनिर्माणचित्तानामस्मितामात्रादुद्भवः इत्युक्त्वातेषांचयोगि शिव
चित्तमेवानुष्ठापकमितिप्रदर्श्ययोगिचित्तस्यचित्तांतरवैलक्षण्यमभिधायतत्कर्मणामलौकिकत्वंचोपपाद्यवि ४९
पाकानुगुणानांचवासनानामभिव्यक्तिसामर्थ्यंकार्यकारणयोश्चैक्यप्रतिपादनेनव्यवहितानामपिचवासनानामानं

तर्यमुपपाद्यतासामानेत्येपिहेतुफलादिद्वारेणहानमुपदर्श्यअतीतादिषुधर्माणांसद्भावमुपपाद्यविज्ञानवादं
निराकृत्यसाकारवादंचप्रतिष्ठाप्यपुरुषस्यज्ञातृत्वमुक्त्वाचित्तद्वारेणसकलव्यवहारनिष्पत्तिमुपपाद्यपुरुषसि
द्धौप्रमाणमुपदर्श्यकैवल्यनिर्णयायदशभिःसूत्रैःक्रमेणोपयोगिनोर्थानभिधायशास्त्रांतरेप्यतदेवकैवल्यमि
त्युपपाद्यकैवल्यस्वरूपंनिर्णीतमितिव्याकृतः कैवल्यपादः ४ सर्वेयस्यवशाः प्रतापवसतेःपादांतसेवा
भतिप्रभ्रश्यन्मुकुटेषुमूर्धसुदधत्याज्ञांधरित्रीभृतः यद्वक्त्रांबुजमाप्यगर्वमसमंवाग्देवतापिश्रितासश्रीभो
जपतिःफणाधिपतिकृतःसूत्रेषुवृत्तिंव्यधात् इतिश्रीधारेश्वरविरचितायांराजमार्तंडाभिधानायांपातं
जलयोगशास्त्रवृत्तौकैवल्यपादश्चतुर्थः संपूर्णश्रीसांबसदाशिवोविजयते चैत्रशुध्द्वादशीगुरुवा
सरेप्लवंगनामसंवत्सरे शाके १७०९ श्रीरामकृष्णार्पणमस्तु श्रीरस्तु श्रीरस्तु ७९ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतियोगसूत्रग्रंथसंपूर्णश्रीकृष्णार्पणमस्तु श्रीरस्तु

शिव
५०